| II. | भवः | भवथः | भवथ |
| | भवाः | भवाथः | भवाथ |
| III. | भवाम् | भवावः | भवामः |
| | | भवाव | भवाम |

*III.—Present Conditional.*

| | | | |
|---|---|---|---|
| I. | भविषति | भविषतः | भविषन्ति |
| | भविषाति | भविषातः | भविषान्ति |
| II. | भविषसि | भविषथः | भविषथ |
| | भविषासि | भविषाथः | भविषाथ |
| III. | भविषामि | भविषावः | भविषामः |
| | | भविषाव | भविषाम |

*IV.—Imperfect Conditional.*

| | | | |
|---|---|---|---|
| I. | भविषत् | भविषतः | भविषन् |
| | भविषात् | भविषातः | भविषान् |
| II. | भविषः | भविषथः | भविषथ |
| | भविषाः | भविषाथः | भविषाथ |
| III. | भविषाम् | भविषावः | भविषामः |
| | | भविषाव | भविषाम |

*V.—Strong Present Conditional.*

| | | | |
|---|---|---|---|
| I. | भाविषति | भाविषतः | भाविषन्ति |
| | भाविषाति | भाविषातः | भाविषान्ति |
| II. | भाविषसि | भाविषथः | भाविषथ |
| | भाविषासि | भाविषाथः | भाविषाथ |
| III. | भाविषामि | भाविषावः | भाविषामः |
| | | भाविषाव | भाविषाम |

*VI.—Strong Imperfect Conditional.*

| | | | |
|---|---|---|---|
| I. | भाविषत् | भाविषतः | भाविषन् |
| | भाविषात् | भाविषातः | भाविषान् |

| | | |
|---|---|---|
| II. भाविषः | भाविषथः | भाविषथ |
| भाविषाः | भाविषाथः | भाविषाथ |
| III. भाविषाम् | भाविषावः | भाविषामः |
| | भाविषाव | भाविषाम |

३४२८ । स उत्तमस्य । ३ । ४ । ९८ ।

लेडुत्तमसकारस्य वा लोपः स्यात् । करवाव । करवावः । टेरेत्वम् ।

3428. The 's' of the first person is optionally elided in the Subjunctive.

As करवाव or करवावः, करवाम or करवामः । The first person is used in the sûtra to indicate that the स् is not elided in any other person.

३४२९ । आत ऐ । ३ । ४ । ९५ ।

लेट आकारस्यै स्यात् । 'सुतेभिः सुप्रयसा मादयैते' । आतामित्याकारस्यैकारः । विधि-सामर्थ्यादाट ऐत्वं न । अन्यथा हि ऐटमेव विदध्यात् । 'यो यजाति यजात इत्' ।

3429. In the Subjunctive, 'ai' is the substitute of 'â' of आताम् and आथाम् in the first and second person dual of the Atmanepada.

Thus मन्त्रयैते, मन्त्रयैथे, करवैते, करवैथे । Why is not the augment आट् changed into ऐ ? Because otherwise the rule enjoining आट् would be superfluous, and the sûtra enjoining आट् ought to have enjoined ऐट् at once.

सुतेभि : सुप्रयसा मादयैते (Rig Veda IV. 41. 3). Here the affix आताम् is changed to ऐते ॥ The regular form एते the आ is changed to ए by III. 4 79. S. 2233.

The आ of the augment आट् is not changed to ऐ as we have already said above, and here we have the forms यजाति &c. यो यजाति यजात इत् (Rig Veda VIII. 31. 1).

३४३० । वैतोऽन्यत्र । ३ । ४ । ९६ ।

लेट् एकारस्य 'ऐ' स्याद्वा । 'आत ऐ' (३४२९) इत्यस्य विषयं विना । 'पशूनामीशै' । 'ग्रहा गृह्यान्तै' । 'अन्यत्र' किम् । 'सुप्रयसा मादयैते' ।

3430. In the Subjunctive, 'ai' is optionally the substitute of 'e', in other places than those mentioned in the last sûtra.

Thus शयै, ईशै &c, in the following examples : —सप्ताहानि शयै, अहमेव पशूनामीशै, मदया एव वो ग्रहा गृह्यान्तै, मद्धैवत्यान्यव वः पात्राण्युच्यान्तै । And in the alternative we have simply ए. as यत्र क्व च ते मनो तदम दधसउत्तरम ।

NOTE :—ईशै from the root ईश ऐश्वर्ये । It is the 1st Pers. Sing, The Atmanepada Personal ending इट् of the 1st Pers. Sing. is changed to ऐ । This इ is not elided by. III. 4. 97. S. 3426, because that sûtra is confined to Parasmaipada इ ॥ The इ is changed to ए by III. 4. 79. S. 2233, then ए changed to ऐ by this sûtra.

गृह्यान्तै from ग्रह in the Passive. The य of the Passive is added, and then the 3rd Pers. Plural झि or अन्ति । The Personal ending takes the augment आट् and becomes आन्ति ॥ The र of ग्रह is changed to ऋ by VI. 1. 16. S. 2412, and the इ of आन्ति is changed to ए by III. 4. 79. S. 2233, and this ए is changed to ऐ by the present sûtra.

३४३१ । उपसंवादाशङ्कयोश्च । ३ । ४ । ८ ।

पणबन्ध आशङ्कायां च लेट् स्यात् । 'अहमेव पशूनामीशै' । 'नेज्जिह्मायन्तो नरकं पताम' । हृषः श्नः शानज्झौ' (२५५७) ।

3431. Where a contingent promise (a reciprocal agreement), or where apprehension is implied, the affix 'Leṭ' is employed after a root, in the Chhandas Literature.

The word उपसम्वाद means 'reciprocal agreement, contracting to do.' Thus यदि मे भवानिदं कुर्यात् अहमपि भवत इदं दास्यामि 'If you do this for me, I will give this to you.' Agreements like these are called उपसम्वाद ; while guessing or inferring the result from a cause is called आशङ्का 'apprehension or fear.'

Thus अहमेव पशूनामीशै ॥ This is the reply of Rûdra, when he was solicited by the Devas, to conquer Tripura. The word पशु means "bound souls, jivas treading the round of Samsâra." पताम is Leṭ the final स् is elided by III. 4. 98 S. 3428. मदग्र यव वा यद्य गृह्यान्ते ॥ मद्वेवन्यान्येव वः पात्रायपुच्यान्ते ॥ नेज्जिह्मायन्तो (or. नेज्जिह्मायन्त्यो) नरकं पताम ॥ (Nir. I. 11. Bohtlingk) = जिह्माचरणेन नरकपात आशंक्यते ॥ All the above examples have the sense of Potential, but the Subjunctive (Leṭ) must be employed necessarily in these senses and not optionally, which anuvṛitti was understood in the last sûtra.

By III. 1. 83, S. 2557, in the Imperative 2nd Pers. Singular, शानच् is sometimes substituted for the vikaraṇa श्ना, after the Kryâdi roots ending in consonants. By the next sûtra, शायच् is optionally the substitute in the Vedas.

३४३२ । छन्दसि शायजपि । ३ । १ । ८४ ।

अपिशब्दाच्छानच् । '+ हृग्रहोर्भश्छन्दसि +' इति हस्य भः । 'गृभाय जिह्वया मधु' । 'बधान देव सवितः' । 'अनिदिताम्—' (४१५) इति बन्धातेर्नलोपः । 'गृभ्णामि ते' । 'मध्वा जभार' ।

3432. In the Chhandas, शायच् is also the substitute of श्ना after roots ending in consonants, when हि follows.

Thus गृभाय जिह्वया मधु, (Rig Veda VIII. 17. 5.) "take up the honey with the tongue." The affix शानच् is also employed by force of the word api in the aphorism as बधान पशून् 'bind the beasts.'

*Vârt:*—In the Chhandas, भ is substituted for the ह of हृ and ग्रह ॥ Thus गर्दभेन संभरति ; मरुदस्य गृभ्णाति ; सामिधेन्योजभ्रिरे, उद्ग्राभञ्च निग्राभञ्च ब्रह्मदेवा अवीवृधन् ॥

NOTE :—गृभाय is derived from ग्रह् 'to seize'; the र् is vocalised by ग्रहिज्या etc. VI. 1. 16 S. 2412 ; and ह changed to भ by the vârtika above given. Thus ग्रह् श्ना + हि = गृह् + ना = गृभ् + ना = गृभ् + आय (शायच्) = गृभाय 'take up thou.'

NOTE :—बधान is formed by शानच् ; added to the root बन्ध 'to bind' the nasal is elided by VI. 4. 24 S. 415 ; the Imperative affix हि is elided by VI. 4. 105 S. 2202. Thus बन्ध् + श्ना + हि = बध् + श्ना + हि = बध् + आन + हि = बध् + आन + ० = बधान "bind or tether."

Other examples of the change of ह into भ by the above vârtika are given below :—

गृभ्णामि ते (Rig Veda X. 85. 36). मध्वा जभार

३४३३ । व्यत्ययो बहुलम् । ३ । १ । ८५ ।

विकरणानां बहुलं व्यत्ययः स्याच्छन्दसि । 'आण्डा शुष्णस्य भेदति' । भिनत्तीति प्राप्ते । 'जरसा मरते पतिः' । म्रियत इति प्राप्ते । 'इन्द्रो वस्तेन नेषतु' । नयतेर्लोट् शप्सिपौ द्वौ विकरणौ । 'इन्द्रेण युजा तरुषेम वृत्रम्' । तरेमेत्यर्थः । तरतेर्विध्यादौ लिङ् । उःशप्सिप्चेति त्रयो विकरणाः ।

सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च ।

व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेन ।

'धुरि दक्षिणायाः' । दक्षिणस्यामिति प्राप्ते । 'चषालं ये अश्वयूपाय तक्षति' । तक्षन्तीति प्राप्ते । उपग्रहः परस्मैपदात्मनेपदे । 'ब्रह्मचारिणमिच्छते' । इच्छतीति प्राप्ते । 'प्रतीपमन्य ऊर्मिर्युध्यति' । युध्यत इति प्राप्ते । 'मधोस्तृप्ता इवासते' । मधुन इति प्राप्ते । नरः पुरुषः । 'अधा स वीरैर्दशभिर्वियूयाः' । वियूयादिति प्राप्ते । कालः कालवाची प्रत्ययः । 'श्वोऽग्नीनाधास्यमानेन' । लुटो विषये लृट् । 'तमसो गा अदुक्षत' । अधुक्षदिति प्राप्ते । 'मित्रं वयं च सूरयः' । मित्रा वयमिति प्राप्ते । स्वरव्यत्ययस्तु वक्ष्यते । कर्तृशब्दः कारकमात्रपरः । तथा च तद्वाचिनां कृत्तद्धितानां व्यत्ययः । अवादायस्य विषयेऽच् । अवपक्षे विशेषः । यङो यशब्दादारभ्य 'लिङ्याशिष्यङ्' (३४३४) इति ङकारेण । प्रत्याहारः । तेषां व्यत्ययो भेदतीत्यादिरुक्त एव ।

3433. In the Chhandas there is diversely an interchange of the various vikaraṇas शप् and the rest, which have been ordained under special circumstances.

The word व्यत्यय means transgression of the fixed rule, or interchange; taking of two vikaraṇas at a time, and so on. Thus भेदति = भिद+शप् + ति ; instead of भिनत्ति from the root भिद 'to split', belonging to the Rudhâdi class; *e. g.* आण्डा शुष्णस्य भेदति (Rig VIII. 40. 11) "He (Indra) breaks the eggs (children) of Shushṇa"; so also, जरसा मरते पतिः (Rig. X. 86. 11.); here there is मरते = (मृ + शप् + ते) instead of म्रियते ; the root मृ belonging to the Tudâdi class. So also there are two vikaraṇas at one and the same time, in the following. इन्द्रो वस्तेन नेषतु 'May Indra lead by this abode' ; here there is नेषतु 3rd per. sing. of the Imperative (लोट्) of the root नी 'to lead' ; there are two vikaraṇas सिप् and शप् instead of नयतु = (नी + शप् + तु); इन्द्रेण युजा तरुषेम वृत्रम् (Rig. VII. 48. 1). The word तरुषेम (तृ + उ + सिप् + शप् + यम्) is the 1st per. sing. of the Optative (लिङ्) of the root तृ and is formed by *three* vikaraṇas ; the classical form being तरेम 'may we cross.'

*Kârikâ:*—In the Vaidic literature we have many apparent irregularities with regard to the application of (1) सुप् (case-affixes), (2) तिङ् (Personal-endings), (3) उपग्रह (Parasmaipada or Atmanepada affixes), (4) rules of gender, (5) person or (6) tense (7) rules of interchange of consonants, or (8) of vowels, (9) rules of accent (10) rules relating to कृत् and तद्धित affixes and (12) rules relating to the affixes included in the pratyâhâra यङ् (III. I. 22 to III. 1. 86). All these irregularities are explained by the author by the word बहुलम् ॥ In fact, the word *bahulam* not only covers, but explains and justifies all Vaidic anomalies

NOTE :—The word शास्त्रकृत् " science-maker," in the above kârikâ refers to Pâṇini.

Thus :—

(1). Irregular application of case-affixes: धुरि दक्षिणायाः (Rig Veda I. 164. 9.)

Here दक्षिणायाः (Genitive) is used instead of the Locative दक्षिणस्याम् ॥

(2). Irregular application of Personal-endings : चषालं ये अश्वयूपाय तक्षति (Rig Veda I. 162. 6). Here तक्षति is used instead of तक्षन्ति ॥

(3). Irregular use of Parasmaipada and Atmanepadas : as, ब्रह्मचारिणमिच्छते। Here Atmanepada इच्छते is used instead of Parasmaipada इच्छति ॥ Similarly प्रतीपमन्य ऊर्मिर्युध्यति instead of युध्यते ॥

(4). Irregular use of Genders, as मधोस्तृप्ता इवासते । Here the word मधु which is Neuter gender, is declined as Masculine. The classical form is मधुनः ॥

(5). Irregular use of Person. The word नरः in the Kârikâ means Person. As अधा सवीरैः दशभि र्वियूयाः instead of वियूयात् ॥ Here 2nd Person is used for 3rd Person. This word is the Benedictive Mood of the root यु "to mix," with the prefix वि ॥

(6). Irregular use of Tenses. The word काल in the Kârikâ means the affixes denoting *time*. Thus श्वोऽग्नीन् आधास्यमानेन । Here लृट् is used instead of लुट् । It is formed from धा with the affix शानच् (III. 3. 14. S. 3107) and the Mood. affix स्य (III. 1. 33. S. 2186), and the augment मुक् (VII. 2. 82. S. 3101).

(7). Irregular interchange of consonants : as, तमसो गा अदुक्षत् । Here ढ is, not changed to ध । The proper form is अधुक्षत् ।

(8) Irregular vowels : as, मित्र वयं च सूरयः instead of मित्रा वयम् ॥

(9). Irregular use of Accents. This will be illustrated later on.

(10). Irregular use of Kârakas. The word कर्तृ in the Kârikâ means Kâraka; and includes the Kṛit and Taddhita affixes. Thus from the root अद् 'to eat' with the upapada अन्न, a compound is formed by adding the affix अण् । Thus अन्न + अद् + अण् = अन्न + आद = अन्नादः । But in the Vedas, affix अच् is used. Thus अन्न + अद् + अच् = अन्न + अद = अन्नादः । Here though the resulting form in both cases is the same, yet in analysis they will be different. Thus in one case it would be अन्न + आदाय, in the other अन्न + अदाय ॥

(11). The यङ् in the Kârikâ is a Pratyâhâra formed with the य of III. 1. 22, and the ङ् of अङ् in III. 1. 86. There is irregular use of these affixes also in the Vedas. These affixes are :—

1. यङ् Intensive affix. 2. णिच् Causative and Churâdi class affix. 3. यक् Kanḍu yâdi class affix. 4. आयः 5. ईयङ् 6. णिङ् 7. स्य and तासि of the Future Tense &c. 8. सिप् of Leṭ. 9. आम् of Perfect. 10. च्लि and सिच्, क्स, चङ्, and अङ् and चिण् of the Aorist. 11. यक् of the Passive, 12. The vikaraṇas शप्, श्यन्, श्नु, श, श्नम्, उ, श्ना, and the Benedictive अङ् । The irregular use of these has already been illustrated in the examples like भेदति &c.

३४३४ । लिङ्याशिष्यङ् । ३ । १ । ८६ ।

आशीर्लिङि परे धातोरङ् स्याच्छन्दसि । 'वच उम्' (२४५४) । 'मंत्रं वोचेमाग्नये' । + दृशेरग्वक्तव्यः+' । 'पितरं च दृशेयं मातरं च' अङि तु 'ऋदृशोऽङि–' (२४०६) इति गुणः स्यात् ।

3434. The affix अङ् is employed in the Chhandas when the affixes of the Benedictive (आशीर्लिङ्) follow.

This debars शप्. The affixes of the Benedictive are ârdhadhâtuka by III 4. 116. S. 2215; but in the Vedas they are sârvadhâtuka as well; see III. 4. 117. S 3435. The scope of the present rule is confined to the Benedictive of the verbs स्था, गा, गम्, वच्, वद् शक् and रुह ; as उपस्थेयम् ; सत्यमुपगेयम्, गमेम जानतो गृहान्, मंत्रं वोचेमाग्नये ; विदेयमेनां मनसि प्रविष्टां ; व्रतम् चरिष्यामि तच्छकेयम् ; स्वर्गं लोकमारुहेयम्.

*Várt* :—The affix अङ् is employed in the Chhandas after the verb दृश in the Benedictive. Had there been अक्, it would have caused *guṇa* by rule VII. 4. 16. S. 2406 ; to prevent this, अङ् is ordained ; as पितरंच दृशेयं मातरंच (Rig Veda I. 24. 1). 'May I see the father and the mother.'

**३४३५ । छन्दस्युभयथा । ३ । ४ । ११७ ।**

धात्वधिकार उक्तः प्रत्ययः सार्वधातुकार्धधातुकोभयसंज्ञः स्यात् । 'वर्धन्तु त्वा सुष्टुतयः' । वर्धयन्त्वित्यर्थः । आर्धधातुकत्वाण्णिलोपः । 'विशृण्विरे' सार्वधातुकत्वात् श्नुः शृभावश्च । 'हुश्नुवोः–' (२३८७) इति यण् । 'आदृगमहनजनः किकिनौ लिट् च' (३१५१) । आदन्तादृवर्णान्ताद्गमादेश्च किकिनौ स्तः । तौ च लिड्वत् । 'बभ्रिर्वज्रम्' । 'पपिः सोमम्' 'ददिर्गाः । जग्मिर्युवा' । 'जघ्निर्वृत्रममित्रियम्' । जज्ञिः । लिड्वद्भावादेव सिद्धे 'ऋच्छत्यृताम्' (२३८३) इति गुणबाधनार्थं कित्त्वम् 'बहुलं छन्दसि' (३५७८) इत्युत्वम् । ततुरिः । जगुरिः ।

3435. In the Vedas this distinction of 'sârvadhâtuka' and 'ârdhadhâtuka' is not always maintained, and the affixes ordained after roots are promiscuously employed.

In the Vedas, there is no hard and fast rule about *sârvadhâtuka* and *ârdhadhâtuka* affixes. Sometimes the तिङ् and शित् are treated as if they were *ârdhâdhâtuka*. Thus वर्धन्तु त्वा सुष्टुतयः । Here the affixes of the लोट् are treated as *ârdhadhâtuka* and consequently there is the elision of the णिच् by rule VI. 4. 51. S. 2313 ; the proper form of this word would be वर्धयन्तु । Sometimes *ârdhadhâtuka* affixes are treated like *sârvadhâtuka* affixes ; as शृण्विरे ; here the affixes of the लिट् are treated as *sârvadhâtuka* and so there is the Vikaraṇa श्नु and the उ is changed into व । Thus, वि + शृ + श्नु + इरे = वि + शृ + नु + इरे (III. 1. 74. S. 2386.) = वि + शृ + न्व् + इरे (VI. 4. 87. S. 2387.) = विशृण्विरे । Similarly, सुन्विरे । The लिङ् is sometimes treated in the Vedas both as *ârdhadhâtuka* and *sârvadhâtuka* at one and the same time ; as उपस्थेयाम् शरणं बृहन्तम् । Here, by treating the affix as *ârdhadhâtuka*, there is elision of स् in the लिङ् (VII. 2. 79. S. 2211) and by treating it again as *ârdhadhâtuka* the आ of स्था is changed into ए । So also in स्वस्ति the affix is treated as *sâarvadhâtuka* and there is no substitution of भू for अस् as required by II. 4, 52. S. 2470.

In this connection, we read here again the sûtra III. 2. 171. S. 3151.

**३४३५ क । आदृगमहनजनः किकिनौ लिट् च । ३ । २ । १७१ ।**

3435. A. In the Chhandas, the affixes 'ki' and 'kin' in the sense of 'the agent having such a habit &c' come after the verbs that end in long 'â' or short or long 'ṛi' and after the verbs gam 'to go,' han 'to kill,' and jan 'to be produced,' and these affixes operate like 'Lit' causing reduplication of the root.

बभ्रिर्वज्रम् (Rig Ved. VI. 23. 4). From the root भृञ् + कि = बभ्रिः । Reduplication because treated as लिट् ।

पपिः सोमम् ( „ „ ). From पा + कि = पपिः ।

ददिर्गाः ( „ „ ). From दा + कि = ददिः

जग्मिर्युवा (Rig Veda VII. 20. 1.) From गम् + किन् = जग्मिः । The penultimate अ is elided by VI. 4. 98. S. 2263.

जघ्निर्वृत्रममित्रियम् (Rig Veda. IX. 61. 20). From हन् + किन् = जघ्निः । ह changed to घ by VII. 3. 54. S. 358.

जज्ञिःबीजम् (T. S. VII. 5. 20. 1.) From जन् + किन् = जज्ञिः

Q. "Now all the above roots either end in vowel or in simple consonants, and therefore by असंयोगाल्लिट् कित् (I. 2. 5. S. 2242), the affixes कि and किन् (the real affix is इ) would be कित्; why are these affixes enunciated with an indicatory क्?" Ans. They are read as कित् in order to prevent *guna* in the case of roots ending in long ॠ; for by VII. 4. 11. S. 2383, लिट् alone would not have been कित् after long ॠ ॥ The usefulness of the affixes being कित् is illustrated in the next two examples.

मित्रावरुणा ततुरिम् (Rig Veda. IV. 39. 2). ततुरिम् = तारकं । दूरे ह्यध्वा जगुरिः (Rig Veda X. 108. 1).

Here from the roots तॄ प्लवन तरणयोः and गॄ निगरणे both ending in long ॠ we get the forms ततुरिः and जगुरिः by the affix कि ॥ Had the affix been merely इ without indicatory क्, it being like लिट् would have caused guṇa of ॠ by VII. 4. 11. S. 2383; but the indicatory क prevents it.

Thus तॄ + कि = तुर् + कि (the ॠ is replaced by उर् by VII. 1. 103. S. 3578.) Then there is reduplication. And we should get तुर् तुर् + इ ॥ But by I. 1. 59 S. 2213, the उर् substitution does not take place first. It is after reduplication that VII. 1. 103. S. 3578. finds scope. Thus त + कि = तॄ तॄ + कि = तर्तॄ + कि (VII. 4. 66. S. 2244.) = ततॄ + कि (VII. 4. 60. S. 2179). At this stage will apply sûtra VII. 4. 11, and we have ततुरिः ॥

Similarly we get जगुरिः ॥

**३४३६ तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः । ३ । ४ । ९ ।**

से । 'वक्षे रायः' । सेन् । 'ता वामेषे' । असे । 'शरदो जीवसे धाः' । असेचित्वादाद्युदात्तः । क्से । प्रेषे । कसेन् । 'गवामिव श्रियसे' । अध्यै । अध्यैन् 'जठरं पृणध्यै' । पक्ष आद्युदात्तः । कध्यै । कध्यैन् । आहुवध्यै । पक्षे नित्स्वरः । शध्यै । 'राधसः सह मादयध्यै' । शध्यैन् । 'वायवे पिबध्यै' । तवै । दातवा उ । तवेङ् । सूतवे । तवेन् । कर्तवे ।

3436. In the Vedas the following affixes come after roots with the force of the affix 'tumun', viz :—'se', 'sen', 'ase', 'asen', 'kse', kasen', 'adhyai', 'adhyain', 'kadhyai', 'kadhyain', 'śadhyai', śadhyain', 'tavai', taveN', and 'taven.'

In the Vaidic literature, the Infinitive is formed by the above 15 affixes. These, when stripped of their indicatory letters, will be found to consist of the following five affixes :—(1) से = से, सेन् and क्से ॥ (2) असे = असे, असेन् and कसेन् ॥ (3) अध्यै = अध्यै, अध्यैन्, कध्यै, कध्यैन्, शध्यै and शध्यैन् ॥ (4) तवै ॥ (5) तवे = तवेङ् and तवेन् ।

The difference in the affixes is made by four indicatory letters, viz. न्, क्, श् and ष् । The forces of क् श् and ष् have already been explained; the indicatory न् makes the word take the *udâtta* accent on the first syllable (VI. 1. 197. S. 3686). Thus से is acute (III. 1. 3. S. 3701); सेन् has acute on the first syllable of the word (VI. 1 197); असे has accent of the affix (III. 1. 3); असेन् throws the accent on the first syllable of the word; the indicatory श makes the numbers 11 and 12 Sârvadhâtuka, and the root takes the proper Vikaraṇa of its class before these affixes; while before तवै, the acute falls both on the first syllable and the last syllable simultaneously (VI. 1. 200. S. 3688. VI. 2. 51. S. 3785.)

Before going to give examples of these affixes, let us explain what is meant by तुमर्थ 'the sense of the affix तुम्' । The word तुमर्थ is here equivalent to भाव or 'action'; for the *pratyayas* or affixes, to which no meaning has been assigned in grammar, convey the meaning of the bases to which they are added. Thus no special meaning having been attached to तुमुन्, it will convey the meaning of the root to which it is added, *i. e.* it will denote the 'action' of the verb, or Infinitive mood. (1) से—वक्षे (from वच् + से) रायः । (2) सेन्—तावामेषे रथानाम् (Rig. V. 66. 3). from इ, एषे । (3 and 4) असे and असेन्—श्रसे मतं शरदो जीवसे धाः (Rig. III. 36. 10), So also क्रत्वे दक्षाय जीवसे' (Rig. X. 57. 4). With असेन् the word will be जीवसे । (5) असे—प्रैषे भगाय from इ, इषे । प्र + इषे = प्रैषे (6) कसेन् गवामिव श्रियसे (Rig. V. 59. 3). It has not the नित् accent (VI. 1. 197) which would have given us श्रियसे । (7 and 8) अध्यै, अध्यैन् जठरं पृणध्यै । The accent is on the last in one case and on the first in the other. (9) कध्यै—इन्द्राग्नी आहुवध्यै (Rig VI. 60. 13). (10) कध्यैन् श्रियध्यै । (11 and 12) शध्यै, शध्यैन्—पिबध्यै (Rig VI. 27. 5); the accent however is on पि । सह मादयध्यै (Rig. VI. 60 13). (13) तवै—सोममिन्द्राय पातवै । (14) तवेङ्—तं ते गर्भं हवामहे दशमे मासि सूतवे (Rig. X. 184. 3). (15) तवेन्=गंतवे (Rig. I. 46. 7); कर्तवे (Rig. I. 85. 9); हर्तवे ॥

३४३७ । प्रयै रोहिष्यै अव्यथिष्यै । ३ । ४ । १० ।

एते तुमर्थे निपात्यन्ते । प्रयातुं रोढुमव्यथितुमित्यर्थः ।

3437. The words 'prayai,' 'rohishyai,' and 'avyathishyai' are irregular Vaidic Infinitives.

Thus (1) प्रयै देवेभ्यो महीः (Rig. I. 142. 6); प्र + या + कै = प्रयै = प्रयातुम् । (2) अपामोषधीनां रोहिष्यै । रुह् + इष्यै = रोहिष्यै = रोहणाय । (3) अ + व्यथ् + इष्यै = अव्यथिष्यै = अव्यथनाय ।

३४३८ । दृशे विख्ये च । ३ । ४ । ११ ।

द्रष्टुं विख्यातुमित्यर्थः ।

3438. The words 'dṛiśe' and 'vikhye' are anomalous Vaidic Infinitives.

Thus दृशे विश्वाय सूर्यम् (Rig. I. 50. 1) = द्रष्टुम् । विख्ये त्वा हरामि = विख्यातुम् ।

३४३९ । शकि णमुल्कमुलौ । ३ । ४ । १२ ।

शक्नोतावुपपदे तुमर्थे एतौ स्तः । 'विभाजं नाशकत्' । 'अपलुपं नाशकत्' । विभक्तुमपलोप्तुमित्यर्थः ।

3439. The affixes 'ṇamul' and 'kamul' are added to roots in the Chhandas to form Infinitives, when they are governed by the verb 'śak' (to be able.)

Of the affix णमुल् the real affix is अम्; the letter ण् causes vriddhi (VII. 2. 115); and ल regulates the accent (VI. 1. 193). So also of कमुल् the letter क् prevents guṇa and vriddhi substitution (I. 1. 5.).

Thus अग्निं वै देवा विभाजं नाशक्नुवन् 'the Gods were not able to divide Agni.' विभज् + णमुल् = विभाजं = विभक्तुम्। So also अपलुपं नाशक्नुवन्, instead of अपलोप्तुम्।

३४४० । ईश्वरे तोसुन्कसुनौ । ३ । ४ । १३ ।

'ईश्वरो विचरितोः'। 'ईश्वरो विलिखः'। विचरितुं विलेखितुमित्यर्थः।

3440. The affixes 'tosun' and 'kasun' are added to roots in the Chhandas, to form Infinitives, when the word 'îśvara' is in composition.

Thus ईश्वरोऽभिचरितोः=अभिचरितुम्। ईश्वरो विलिखः = विलिखितुम्। ईश्वरो वितृदः = वितर्दितुम्।

३४४१ । कृत्यार्थे तवैकेन्केन्यत्वनः । ३ । ४ । १४ ।

'न म्लेच्छितवै'। 'अवगाहे'। 'दिदृक्षेण्यः'। 'भूर्यस्पष्ट कर्त्वम्'।

3441. The affixes 'tavai,' 'ken,' 'kenya' and 'tvan' are added to roots in the Chhandas, in the sense of the 'Kritya-affixes.'

The force of *kritya* affixes is to denote 'action' (भाव) and 'object' (कर्मन्). Thus अन्वेतवै=अन्वेतव्यम्; परिधातवै=परिधातव्यम्; नावगाहे = नावगाहितव्यम्; दिदृक्षेण्यः (Rig. I. 106. 5)=दिदृक्षितव्यः; शुश्रूषेण्यः=शुश्रूषितव्यम्; कर्त्वम्; (Rig. I. 10. 2)=कर्तव्यम्।

The affix तवै was mentioned in sûtra III. 4. 9, also; there it had the force of the Infinitive, and here that of the Passive Participle. For its accent, see VI. 1. 200; 2. 51.

३४४२ । अवचक्षे च । ३ । ४ । १५ ।

'रिपुणा नावचक्षे'। अवख्यातव्यमित्यर्थः।

3442. The word 'avachakshe' is an anomalous passive participle in the Vedas.

Thus रिपुणा नावचक्षे (Rig. IV. 58. 5)=नावख्यातव्यम्। अव + चक्ष् + एश् = अवचक्षे। The sûtra II. 4. 54. S. 2436, is not applied here.

३४४३ । भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् । ३ । ४ । १६ ।

'आसंस्थातोः सीदन्ति'। आसमाप्तेः सीदन्तीत्यर्थः। उदेतोः। अपकर्तोः। प्रवदितोः। प्रचरितोः। होतोः। आतमितोः। 'काममाविजनितोः संभवाम'।

3443. The affix 'tosun' comes in the Vedas after the following verbs, when mere name of the action is indicated, viz:— 'sthâ' (to stand), 'in' (to go), 'kriñ' (to make), 'vad' (to speak), 'char' (to walk), 'hu' (to sacrifice), 'tam' (to grow tired) and 'jan' (to produce).

These are also Infinitives. The phrase कृत्यार्थे is not to be read into this sûtra. The word भावलक्षण qualifies the sense of the root (भावो लक्ष्यते येन).

Thus, स्था—आ संस्थातोर्वेद्यां सीदन्ति=आसमाप्तेः सीदन्ति । इण्—पुरा सूर्यस्योदेतोराधेयः । कस्—पुरा वत्सानामपाकर्तोः । वद्—पुरा प्रवदितो रग्नौ प्रहोतव्यम् । चर्—पुरा प्रचरितोरार्त्नीध्रीये होतव्याः । (Gopatha Brahmana II. 2. 10) । हु—आ होतोरप्रमत्तस्तिष्ठति । तम्—आ तमितोरासीत (Taitt. Br. I. 4 4. 2) जन्—आ विजनितोः सम्भवाम (Taitt. S. II 5. 1. 5).

३४४४ । सृपितृदोः कसुन् । ३ । ४ । १७ ।

भावलक्षण इत्येव । 'पुरा क्रूरस्य विसृपो विरप्शिन्' । 'पुरा जत्रुभ्य आतृदः' ।

इति तृतीयोऽध्यायः ।

3444. In the Vedas, the affix 'kasun' comes after the verbs 'srip' (to creep) and 'trid' (to injure), in the sense of Infinitives indicating name of action.

Thus विसृपः । पुरा क्रूरस्य विसृपः (Yaj. I. 28.); आतृदः । पुरा जत्रुभ्य आतृदः (Rig. VIII. 1. 12). These words are Indeclinable by I. 1. 40. S. 450.

## CHAPTER IV.

३४४५ । रात्रेश्चाजसौ । ४ । १ । ३१ ।

रात्रिशब्दान्ङीप्स्यात् अजस्विषये छन्दसि । 'रात्री व्यख्यदायती' । लोके तु कृदिकारादिति ङीषन्तोदात्तः ।

3445. The affix 'ṅíp' comes after the word 'râtri' in the Chhandas, and in denoting a Name, except when the affix 'jas' (nominative plural) is added.

Thus रात्री व्यख्यदायति, या रात्री सृष्टा, रात्रीभिः ( 3rd pl. ) ; (Rigveda X. 127. 1. I. 35. 1.) but in the nominative plural we have रात्रयः, the regular plural of the word रात्रि, as in the sentence यास्ता रात्रयः, instead of रात्र्यः । In the classical literature. the feminine is formed by ङीष् ( IV. 1. 45 ) with acute on the final.

NOTE:—According to Kâtyâyana, ṅip is not added, not only when we apply the nominative plural termination जस्; but in all other terminations beginning with जस् also. Thus रात्रिं सहोषित्वा; here in the accusative singular case also the ङीप् is not employed.

But how do you explain the form रात्र्यः in the following तिमिरपटलैरवगुण्ठिताश्च रात्र्यः ? This 'râtrya' is the nominative plural of 'râtri' which is formed by the feminine affix ṅip ; and not by ṅish. The forms evolved by adding ङीष् or ङीप् are one and the same, except with regard to accent ; that formed by ṅish has udâtta accent on the final : the other has it on the initial. The word रात्रि is formed by the krit affix त्रिप् (Un. IV. 67), and therefore. it is a word which is governed by IV. 1. 45 because it is a word falling in Bahuvâdi class, by virtue of the general subrule "a word ending with the vowel इ of a krit affix, other than क्तिन् belongs to Bahuvâdi class ; some say that every word ending in इ, if it has not the force of the affix क्तिन् belongs to this class". Therefore it takes ङीष् in forming the feminine.

३४४६ । नित्यं छन्दसि । ४ । १ । ४६ ।

बह्वादिभ्यश्छन्दसि विषये नित्यं ङीष् । 'बह्वीषु हित्वा' । नित्यग्रहणमुत्तरार्थम् ।

3446. The affix 'Nîsh' is always employed in the Vaidic literature, in forming the feminine of the word 'bhu' and the rest.

Thus बह्वीषु हित्वा प्रपिबन् ॥ Here बह्वी is the name of a herb.

The word नित्य 'always' is used in the aphorism, more for the sake of the subsequent sûtra, which it governs than for this sûtra. For the word 'optionally' does not govern this, and the aphorism even without the word 'nitya' would have been a necessary rule and not opitional : for आरम्भसामर्थ्यादेव नित्योविधिः सिद्धः, योगारम्भस्त्वनन्तरयोजनः ॥

३४४६ । भुवश्च । ४ । १ । ४७ ।

ङीष्स्यात् छन्दसि । विभ्वी । प्रभ्वी । विप्रसंभ्य इति डुप्रत्ययान्तं सूत्रेऽनुक्रियते । उत इत्यनुवृत्तेः । उवङादेशस्तु सौत्रः ।

'+मुद्गलाच्छन्दसि लिच्च +' ।लित्स्वरः । 'रथीरभून्मुद्गलानी' । ङीषो लित्त्वमानुगागमः ।

3447. The affix 'ṇîs' is always employed in the Chhandas in forming the feminine, after the word 'bhu.'

Thus विभ्वी, (Rig. Ved. V. 38. 1). प्रभ्वी (Rig Ved. I. 188. 5).

But why not so in the case of स्वयंभूः ? Because it ends in long ऊ, while विभ्वी &c. are feminine of विभु, &c. ending in short उ as these two words are formed by the affix डु (उ) of III. 2. 180. In fact the word उतः "after a word ending in short उ" of sûtra IV. 1. 44 governs this also. The word भुवः is the ablative case of भु irregularly formed by the substitution of उवङ् ; this form being confined to sûtras only.

*Vârt:*—In the Chhandas, the affix ङीष् with the augment आनुक् is added to the word मुद्गल ; and the affix is treated as if it had an indicatory ल् ॥ The force of the indicatory ल् is to make the vowel preceding the affix, take the acute accent (VI 1. 193 लिति). Thus रथीरभून् मुद्गलानी गविष्टौ ॥ ( Rig Veda X. 120. 2.)

३४४८ । दीर्घजिह्वी च च्छन्दसि । ४ । १ । ५९ ।

संयोगोपधत्वादप्राप्तो ङीष्विधीयते । 'आसुरी वै दीर्घजिह्वी देवानां यज्ञवाट्' ।

3448. The form दीर्घजिह्वी 'long tongued' is irregularly formed in the Chhandas.

The word दीर्घजिह्वी is the feminine of दीर्घजिह्व, but as the latter has a conjunct consonant for its penultimate, the feminine affix ङीष् would not have applied to it by IV. 1. 54. The present aphorism enjoins ङीष् ॥ Thus दीर्घजिह्वी in the sentence आसुरीवै दीर्घजिह्वी देवानां यज्ञवाट् ॥

NOTE ;—The word च, and' in the aphorism is used in order to draw in the word संज्ञा from the last, so that the word *dîrgha-jihvî* is always a Name. Moreover by using the feminine form dîrgha-jîhvî in the sûtra, it is indicated that the application of ङीष् is necessary and not optional, as was the case in the preceding Ashṭadhyâyi sûtras.

३४४९ । कद्रुकमण्डल्वो श्छन्दसि । ४ । १ । ७१ ।

ऊङ् स्यात् । 'कद्रूश्च वै कमण्डलूः' ।

'+ गुग्गुलुमधुजतुपतयालूनामिति वक्तव्यम् +' । गुग्गुलूः । मधूः । जतूः । पतयालूः ॥ 'अव्ययात्त्यप्' (१३-४) ।

'✱ आविष्टस्योपसंख्यानं छन्दसि ✱' । 'आविष्ट्यो वर्धते' ।

3449. The feminine affix 'ûṅ' comes in the Vedas after the words 'kadru' (tawny), and 'kamaṇḍalu' (a water pot).

Thus कद्रूश्च वै सुपर्णी च ॥ मास्म कमण्डलुं शूद्राय दद्यात् ॥

Why do we say "in the Vedas." Witness कद्रुः and कमण्डलुः ॥

*Vârt*:—So also after the words गुग्गुलु, मधु, जतु and पतयालु ॥ Thus गुग्गुलूः, मधूः, जतूः, and पतयालूः ।

*Vârt*:—The ष्यप् is added to the word आविष् in the Vedas. As, आविष्ट्यो वर्धते ॥

३४५० । छन्दसि ठञ् । ४ । ३ । १९ ।

वर्षाभ्यः । ठकोऽपवादः । स्वरे भेदः । वार्षिकम् ।

3450. In the Chhandas, the word 'varshâ' takes the affix 'ṭhañ' in the remaining senses.

This debars ठक्. The form will have difference in accent. As नभश्च नभस्यश्च वार्षिकावृतू ॥ The word ऋतु here means "month," i. e. Nabha and Nabhasya are two rainy months.

३४५१ । वसन्ताच्च । ४ । ३ । २० ।

ठञ्स्याच्छन्दसि । वासन्तिकम् ।

3451. In the Chhandas, the affix 'ṭhañ' comes in the remaining senses after the word 'vasanta.'

This debars अण् (IV. 3. 16. S. 1387.) Thus मधुश्च माधवश्च वासन्तिकावृतू ॥

३४५२ । हेमन्ताच्च । ४ । ३ । २१ ।

छन्दसि ठञ् । हैमन्तिकम् । योगविभाग उत्तरार्थः । शौनकादिभ्यश्छन्दसि ' (१४८६) । णिनि प्रोक्तेऽर्थे । छाणोरपवादः । शौनकेन प्रोक्तमधीयते शौनकिनः । वाजसनेयिनः । ' छन्दसि ' किम् ? शौनकीया शिक्षा ।

3452. In the Chhandas, the affix 'ṭhañ' comes in the remaining senses, after the word 'hemanta.'

This debars अण् (IV. 3. 16). Thus सहश्च सहस्यश्च हैमन्तिकावृतू ॥ The making of two separate Sûtras of 20 and 21, is for the subsequent sûtra, in which, the anuvṛitti of the word हेमन्त only is taken.

Here we must refer again to IV. 3. 106. S. 1486.

३३५२ क । शौनकादिभ्यश्छन्दसि । ४ । ३ । १०६ ।

3452. A. The affix 'ṇini' comes in the sense of enounced by him, after the words 'śaunak' &c., in denoting the Chhandas enounced by them.

This debars छ and अण् ॥ Thus शौनकिनः "who study (IV. 2. 64) the Chhandas enounced by Śaunaka." Similarly वाजसनेयिनः ।

Why do we say "in denoting *chhandas*?" Observe शौनकीया शिक्षा "the Orthography of Śaunaka." The affix here is छ (IV. 2. 114. S. 1337).

३४५३ । द्व्यचश्छन्दसि । ४ । ३ । १५० ।

विकारे मयट् स्यात् । शरमयं बर्हिः । ' यस्य पर्णमयी जुहूः ' ।

3453. In the Chhandas, after a dissyllabic word, the affix 'mayaṭ' comes in the sense of 'its product or part.'

This ordains मयट् in the sacred literature in the sense dealt with in IV. 3. 143. S. 1523. Thus पर्णमयः, दर्भमयः शरमयः in the following यस्य पर्णमयी जुहूर्भवति, दर्भमयम् वासो भवति, शरमयम् बर्हि र्भवति ।

३४५४ । नो त्वद्वर्ध्रबिल्वात् । ४ । ३ । १५१ ।

उत्वानुकारवान् । मौञ्जं शिक्यम् । वर्ध्र चर्म तस्य विकारो वार्ध्री रज्जुः । बैल्वो यूपः , सभाया यः ' (१६५७) ।

3454. The affix 'mayaṭ' does not come in the Chhandas after a dissyllabic word, having a short vowel 'u' in it nor after the words 'vardhra' and 'bilwa.'

Thus मौञ्जं शिक्यम् from मुञ्ज by अण् ॥ वार्ध्री बालप्रग्रथिता भवति; बैल्वं ब्रह्मवर्चसकामेन कार्यः ॥

The word उत्वत् means 'having उत् or short u (I. 1. 70).'

The word मुञ्ज is âdy-udâtta by तृणधान्यानां (Phiṭ II. 4): and therefore it takes the universal अण् (IV. 3. 134).

The word वर्ध्र meaning 'skin' is âdyudâtta by Phiṭ II. 19, and therefore takes अण्, the feminine being formed by ङीप् (IV. 1. 15), as वार्ध्री "rope made of leather." बैल्व : means the yûpa in which sacrificial victims are tied.

By the sûtra सभाया यः (IV. 4. 105. S. 1657) the affix य is added to सभा in denoting excellence. But in the Chhandas, the affix ढ is added under similar conditions : as taught below.

३४५५ । ढश्छन्दसि । ४ । ४ । १०६ ।

सभेयो युवा ।

3455. The affix 'ḍh' comes in the Chhandas after the word 'sabhâ,' in the sense 'of excellent with regard thereto.'

This debars य of the preceding sûtra IV. 4. 105. S. 1657. Thus सभेयः in सभेयोऽस्य युवा यजमानस्य वीरो जायताम् 'let a refined, youthful hero be born to this sacrificer.'

३४५६ । भवे छन्दसि । ४ । ४ । ११० ।

सप्तम्यन्ताद्भवार्थे यत् । 'मेध्याय च विद्युत्याय च' । यथायथं शैषिकाणामणादीनां चापवादोऽयं यत् । पक्षे तेऽपि भवन्ति । सर्वविधीनां छन्दसि वैकल्पिकत्वात् । तद्यथा मुञ्जवान्नाम पर्वतस्तत्र भवो मौञ्जवतः । 'सोमस्येव मौञ्जवतस्य भक्षः' ॥ आपादपरिसमाप्तेश्छन्दोऽधिकारः ।

3456. The affix 'yat' comes in the Chhandas, after a word in the locative case in construction, in the sense of 'what stays there.'

This debars अण् च &c. (IV. 3. 53). Those affixes also are employed in the alternative, there being much latitude of grammatical rules in the Vedas. Thus the words मेध्यः and विद्युत्यः in the following hymn of the Yajur Veda (16. 38) : नमो मेध्याय च विद्युत्याय च ॥ All the sûtras henceforward up to the end of the fourth chapter, are Vaidic sûtras, the word छन्दसि being understood in them all. The word भवे governs all the sûtras up to IV. 4. 118, S. 3464.

In the alternatives the affixes यञ् &c., will also be employed. Thus there is a mountain called मुञ्जवान् Muñjavat; from it we get the Derivative word मौञ्जवतः in the sense of तत्र भवः, as in the sentence सोमस्येव मौञ्जवतस्य भक्षः "The eater of Soma plant produced on Muñjavat Mountains."

३४५७ । पाथोनदीभ्यां ड्यण् । ४ । ४ । १११ ।

'तमु त्वा पाथ्यो वृषा' । 'चनो दधीत नाद्यो गिरो मे' । पाथसि भवः पाथ्यः । नद्यां भवो नाद्यः ।

3457. The affix 'ḍyaṇ' comes in the Chhandas, in the sense of 'what stays there,' after the words 'pâthas' and 'nadî,' wherby the last vowel, with the consonant following, is elided.

This debars यत् ॥ Thus पाथसि भवः = पाथ्यः 'watery, celestial,' so also नाद्यः "of the river, fluvial." As in the following hyms 'तमु त्वा पाथ्यो वृषा,' (Rig Ved. VI. 16. 15) 'चनो दधीत नाद्यो गिरो मे' (Rig Ved II. 35. 1). पाथः means firmament, and water.

३४५८ । वेशन्तहिमवद्भ्यामण् । ४ । ४ । ११२ ।

भवे । 'वैशन्तीभ्यः स्वाहा' । 'हैमवतीभ्यः स्वाहा' ।

3458. The affix 'aṇ' comes in the Chhandas in the sense of 'what stays there' after the words 'veśanta' and 'himavat.'

This debars यत ॥ Thus वैशन्तीभ्यः स्वाहा. हैमवतीभ्यः स्वाहा ॥

३४५९ । स्रोतसो विभाषा ड्यड्ड्यौ । ४ । ४ । ११३ ।

पक्षे यत् । ड्यड्ड्ययोस्तु स्वरे भेदः । स्रोतसि भवः स्रोत्यः-स्रोतस्यः ।

3459. The affixes 'ḍyat' and 'ḍya' come optionally in the Chhandas in the sense of 'what stays there,' after the word, 'srotas' and before these affixes the final syllable 'as' of srotas is elided.

This debars यत् which comes in the alternative. As. स्रोतसि भवः = स्रोत्यः or स्रोत्यं (Rig Ved. X. 104. 8) the difference being in the accent (III. 1. 3 and VI. 1. 185). The anubandha ड causes the elision of अस् of स्रोतस् ॥ When यत् is added the form is स्रोतस्यः ॥

३४६० । सगर्भसयूथसनुताद्यन् । ४ । ४ । ११४ ।

अनुभ्राता सगर्भ्यः । अनुसखा सयूथ्यः । 'यो नः सनुत्य उत वा जिघत्नुः' । नुतिर्नुतम् । 'नपुंसके भावेक्तः' (३०९०) । सगर्भादिष्वपि कर्मधारयः । 'समानस्य छन्दसि—' (१०१२) इति सः । ततो भवार्थे यत् । यतोऽपवादः ।

3460. The affix 'yan' comes in the sense of 'what stays there,' after the words 'sagarbha,' 'sayûtha' and 'sanuta.'

This debars यत् the difference being in accent (VI. 1. 197). Thus अनुभ्राता सगर्भ्यः 'a younger brother'. अनुसखा सयूथ्यः 'a younger friend'. नुता भवन्ति अस्मिन् So also यो नः सनुत्यः उत वा जिघत्नुः thief lit. 'who stays in a concealed place', sanuta meaning 'concealed' (see Rig Veda II. 31. 9). From the root नु with the Passive क्त we get नुतम् ॥ The word समान is always changed into स in the Chhandas

(VI. 3. 84). All three are karmadhâraya compounds, as समानस्थानो गर्भश्च = सगर्भः तत्रभवः = सगर्भ्यः ।

**३४६१ । तुग्राद्घन् । ४ । ४ । ११५ ।**

भवेऽर्थे । पक्षे यदपि । 'आ वः शमं वृषभं तुग्र्यासु' इति बह्वृचाः । 'तुग्रियासु' इति शाखान्तरे । 'घनाकाशयज्ञवरिष्ठेषु तुग्रशब्दः' इति वृत्तिः ।

3461. The affix 'ghan' comes in the Chhandas in the sense of 'what stays there,' after the word tugra.,

This debars यत्, which comes in the alternative. Thus तुग्रियः as स्व मग्ने वृषभस् तुग्रियाणां ॥ Which assumes the form तुग्र्य tugrya also. As आवः शमम् वृषभं तुग्र्यासु (Rig Veda I. 33. 15) Tugrya meaning 'sunk in the waters'. Another reading is तुग्रियासु ॥ The word तुग्र means 'food, firmament, sacrifice and varishṭa'.

**३४६२ । अग्राद्यत् । ४ । ४ । ११६ ।**

3462. The affix 'yat' comes in the Chhandas in the sense of 'what stays there', after the word 'agra.'

Thus अग्रे भवं = अग्र्यम् ॥ Why this separate rule, for यत् would have come after अग्र by the general rule IV. 4. 110? The repetition is to show that यत् is not debarred by घ and छ of the next sútra, which would have been the case, had this sûtra not existed.

**३४६३ । घच्छौ च । ४ । ४ । ११७ ।**

चाद्यत् । अग्रे भवोऽग्रयः–अग्रियः – अग्रीयः ।

3463. The affixes 'ghach' and 'chha' come in the Chhandas in the sense of 'what stays there', after the word 'agra.'

Thus अग्र्यम् by (यत्), अग्रीयम् (by छ) and अग्रियम् (by घच्). And अग्रियम् (by घन्) from IV. 4. 115. See R. V. 1. 13. 10 इहत्वष्टारमग्रियम् ॥

**३४६४ समुद्राभ्राद् घः । ४ । ४ । ११८ ।**

'समुद्रिया अप्सरसो मनीषिणम्' । 'नासदतो अभ्रियस्येव घोषाः' ।

3464. The affix 'gha' comes in the Chhandas in the senses of 'what stays there,' after the words 'samudra' and 'abhra.'

This debars यत् ॥ Thus समुद्रियः and अभ्रियः, as in समुद्रिया अप्सरसो मनीषिणम् and नासदतो अभ्रियस्येव घोषाः ॥ The word 'abhra', being a word of fewer syllables than 'samudra', ought to have come first. Its coming as a second member is an irregularity, and shows that the rule of pûrva-nipâta is not of universal application.

**३४६५ । बर्हिषि दत्तम् । ४ । ४ । ११९ ।**

प्राग्घिताद्यदित्येव । 'बर्हिष्येषु निधिषु प्रियेषु' ।

3465. The affix 'yat' comes in the Chhandas in the sense of 'given,' after the word 'barhis' in the 7th case in construction.

The anuvṛitti of तत्र भवः ceases. Thus बर्हिष्येषु निधिषु प्रियेषु ॥ R. V. 10. 15, 5.

**३३६६ । दूतस्य भागकर्मणी । ४ । ४ । १२० ।**

भागोंऽशः । दूत्यम् ।

3466. The affix 'yat' comes in the Chhandas after the word 'dûta' in the genitive case in construction, in the sense of 'its share' or 'its duty.'

Thus दूत्यम् 'the share of a messenger or the work of a messenger.' As यत्ते अग्ने दूत्यम् ॥ According to VI. 1. 213, the accent will be दूँत्यम् but the accented Text reads दूत्यं॑ ॥

३४६७ । रक्षोयातूनां हननी । ४ । ४ । १२१ ।

'या तेऽग्ने रक्षस्या तनूः' ।

3467. The affix 'yat' comes in the Chhandas in the sense of 'killer,' after the words 'raksha' and 'yâtu' in the sixth case in construction.

That by which anything is killed is called हननी ॥ Thus रक्षस्य and यातव्य meaning 'that which kills the demons called Rakshas and Yâtus.' As या ते अग्ने रक्षस्या तनूः i. e. रक्षसां हननी ॥ 'O Agni thy bodies are killers of Rakshas.' So यातव्याः तनूः ॥ The word is in the plural as a mark of respect.

३४६८ । रेवतीजगतीहविष्याभ्यः प्रशस्ये । ४ । ४ । १२२ ।

प्रशंसने यत्स्यात् । रेवत्यादीनां प्रशंसनं रेवत्यम् । जगत्यम् । हविष्यम् ।

3468. The affix 'yat' comes in the Chhandas, in the sense of 'praising', after the words 'revatî,' 'jagatî' and 'havishya' in the sixth case in construction.

The word प्रशस्य means प्रशंसन 'praising, extolling,' formed by adding the Krit affix क्यप् to the root, with the force of भाव or 'condition.' Thus रेवत्यम्, जगत्यम् and हविष्यम् 'praising of Revatî, Jagatî or Havishya.' The word हविष्यम् is thus formed हविषे हिता = हविष्याः 'things fit for offering' i. e. butter &c. (हविष् + यत् V. I. 4) हविष्यानाम् प्रशंसनं = हविष्यम् (हविष्य + यत् IV. 4. 122 = हविष्य् + यत् the final अ being elided by VI. 4. 148 = हविष् + यत् the य् being elided by VIII. 4. 64).

३४६९ । असुरस्य स्वम् । ४ । ४ । १२३ ।

'असुर्यं देवेभिर्धायि विश्वम्' ।

3469. The affix 'yat' comes in the Chhandas in the sense of 'property,' after the word 'asura' in the 6th case in construction.

This debars अण् ॥ Thus असुर्यम् 'belonging to the Asuras.' As असुर्यं वा एतत् पात्रं यच्चक्रधृतं कुलालकृतम् 'this vessel made on a wheel by a potter belongs to the Asuras.' असुर्यं देवेभिर्धायि विश्वम् ॥ See Maitr S. I. 8. 3. So also असुर्या नाम ते लोकाः (Ishop. 3).

३४७० । मायायामण् । ४ । ४ । १२४ ।

आसुरी माया ।

3470. The affix 'aṇ' comes in the Chhandas in the sense of 'glamour,' after the word 'asura' in the 6th case in construction.

This debars यत् ॥ असुरस्य माया=आसुरः feminine आसुरी ॥ As आसुरी माया स्वधया कृतासि ॥

**३४७१ । तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक्च मतोः । ४ । ४ । १२५ ।**

वर्चस्वानुपधानो मन्त्र आसामिष्टकानां वर्चस्याः । ऋतव्याः ।

3471. The affix 'yat' comes in the Chhandas, after a nominal stem, in the 1st case in construction, ending with the affix 'matup,' when the sense is "this is their mantra of putting up," provided that, the things put up are bricks : And the affix matup is elided by luk.

This sûtra requires analysis. तद्वान् is formed by adding मतुप् to तद् meaning 'having that,' and refers to a noun formed by the affix मतुप् ॥ The word आसाम् is genitive plural fem. of इदं meaning 'of them'; the pronoun refers to the word इष्टका ॥ The word उपधान means 'putting up,' and technically means 'used as a Mantra in the putting up of sacrificial bricks, pots &c' मन्त्र "sacred hymn" इष्टका 'bricks.' The whole sûtra means "the affix 'yat' is used with the force of a genitive (âsâm), after a word which ends with matup (tadvân), and denotes a mantra used in putting up of sacrificial objects; when such mantra refers to bricks: and when this affix yat is added, the affix matup is elided.' Thus वर्चस्वान् is a Mantra containing the word वर्चस् ॥ The bricks put up or collected (उपधीयते) with the recitation of वर्चस्वान् Mantra, will be called वर्चस्या (वर्चस्वत् + यत् = वर्चस् + यत् the affix वत् (मतुप) being elided=वर्चस्य, fem. वर्चस्या) ॥ Thus वर्चस्या उपदधाति 'he collects Varchasya bricks i. e. on which Varchasvân mantra has been pronounced' So तेजस्यां उपदधाति ॥ So पयस्याः, रेतस्याः ॥

NOTE :—Why do we say तद्वान् ? The affix is not to be added to the whole Mantra. Why do we say, उपधान 'putting up' ? The affix is not to be added to other Mantras such as those used in praying etc. e. g वर्चस्वानुपस्थान मन्त्र आसामिष्टकानाम्, here there will be no affix. Why do we say Mantra ? Observe अंगुलिमानुपधानो हस्त आसाम् 'these bricks are collected with hand having fingers,' here there will be no affix. Why do we say इष्टकासु ? Observe वर्चस्वानुपधानो मन्त्र एषां कपालानाम्, here there will be no affix, the thing collected being potsherds and not bricks.

**३४७२ । अश्विमतोऽण् । ४ । ४ । १२६ ।**

'आश्विनीरुपदधाति' ।

3472. The affix 'aṇ' comes in the Chhandas, after the words aśvimân, to denote bricks put up with the Mantra containing the word Aśvin, and the affix matup is elided.

Thus अश्विमानुपधानो मन्त्र आसामिष्टकानां = आश्विनः fem. आश्विनीः ॥ The word is thus formed. अश्विमान् + अण् = अश्वि + अण् the matup being elided IV. 4 125 = अश्विन् + अण् VI. 4. 164 = आश्विन् ॥ Thus आश्विनीरुपदधाति 'he collects Aśvin bricks i. e. bricks at the time of collecting which Mantras containing अश्विन् were uttered. See Yajur Veda Tait S. 5. 3. 1. 1.

३४७३ । वयस्यासु मूर्ध्नो मतुप् । ४ । ४ । १२७ ।

तद्वानासामिति सूत्रं सर्वमनुवर्तते । मतोरिति पदमावर्त्य पञ्चम्यन्तं बोध्यम् । मतुबन्तो यो मूर्धशब्दस्ततो मतुप्स्यात् । प्रथमस्य मतोर्लुक्च । वयःशब्दवन्मन्त्रोपधेयास्विष्टकासु । यस्मिन्मन्त्रे मूर्धवयःशब्दौ स्तः । तेन 'उपधेयासु मूर्धन्वतीरुपदधाति' इति प्रयोगः ।

3473. The affix 'matup' is added in the Chhandas, to the word 'mûrdhanvat,' in expressing bricks collected with the Mantra containing the word 'vayas.'

The whole of the sûtra 3471 is understood here. The word मतोः should be repeated, and is to be construed in the Ablative case. The sûtra means "After the word mûrdha ending in matup, i. e. after the word murdhavat, there is added a second matup, and there is elision of the first matup when the bricks are collected with vayas mantra." The word वयस्या means the bricks, the Upadhâna mantras of which contain the word वयस् ॥ The affix मतुप् debars यत् ॥ A mantra which contains both the word वयस् and मूर्धन्, that Mantra is both वयस्वान् and मूर्धन्वान् ॥ Now in denoting sacrificial bricks put up with such a mantra, the affix यत् would have come by IV. 4. 125 after both these words वयस्वान् and मूर्द्धन्वान् ॥ The present sûtra ordains मतुप् after मूर्द्धन्वान् ॥ Thus मूर्द्धन्वतीरुपदधाति 'he collects Mûrdhanvatî bricks.' The words वयस्याः and मूर्द्धन्वत्यः denote the same object. See VI. 1. 176.

३४७४ । मत्वर्थे मासतन्वोः । ४ । ४ । १२८ ।

नभोऽभ्रम् । तदस्मिन्नस्तीति नभस्यो मासः । ओजस्या तनूः ।

3474. The affix 'yat' comes in the Chhandas with the force of matup, after a word in the first case in construction, the word so formed meaning a month or a body.

This debars the affix मतुप् and those having the sense of मतुप् ॥ Thus नभांसि विद्यन्ते यस्मिन् मासे = नभस्यः 'the month of clouds' i. e. June-July.

Similarly ओजस्या तनूः 'the bodies full of vigor.'

३४७५ । मधोर्ञ च । ४ । ४ । १२९ ।

चाद्यत् । माधवः – मधव्यः ।

3475. The affix 'ña' as well as 'yat' comes with the force of matup, in the Chhandas, after the word 'madhu.'

Thus माधवः or मधव्यः

३४७६ । ओजसोऽहनि यत्खौ । ४ । ४ । १३० ।

ओजस्यमहः । ओजसीनं वा ।

3476. The affixes 'yat' and 'kh' come with the force of matup, after the word 'ojas,' when a day is meant.

Thus ओजस्यम् or ओजसीनं = अहः 'the day' lit. full of heat.

३४७७ । वेशोयशआदेर्भगाद्यल्खौ । ४ । ४ । १३१ ।

वेशो बलं तदेव भगः । वेशोभग्यः । यशोभग्यः । वेशोभगीनः । यशोभगीनः ।

3477. The affixes 'yal' and 'kh' come in the Chhandas, with the force of matup, after the word bhaga, having the words 'veśas' or 'yaśas' in the beginning.

The rule of yathâ-sankhya does not apply here.

The ल् of यल् shows that the accent falls on the vowel preceding the affix (VI. 1. 193). Thus वेशोभगो विद्यते यस्य स = वेशोभग्यः 'strong-fortune' so also यशोभग्यः 'famous-fortune.' The word वेश means 'strength' : भग means 'fortune, desire, effort, greatness, virility and fame.' The word वेशोभग: may be taken as a Dvandva compound of वेशस् 'force' and भग: 'fortune.' The word वेशोभग्य: would then mean 'possessed of power and fortune.' With ख, वेशोभगीन:, यशोभगीन: ।

NOTE :—Kâsikâ does not read ख into this sûtra. That is more reasonable.

३४७८ । ख च । ४ । ४ । १३२ ।

योगविभाग उत्तरार्थ । क्रमनिरासार्थश्च ।

3478. The affix 'kh' also comes after the words 'veśobhaga' and 'yaśobhaga,' in the Chhandas, with the force of matup.

Thus वेशोभगीन: and यशोभगीन: ॥

*Note according to the Kásiká* :—This sûtra has been separated from the last in order to prevent the application of the यथासंख्य rule (I. 3. 10). For had the sûtra been वेशोयश आदेर्भगाद् यल्खौ, as it occurs in the Siddhanta Kaumudi, then the affix यल् would apply to वेशोभग, andthe affix ख to यशोभग: which is not what is intended. Another reason for making it a distinct aphorism is that the anuvritti of ख runs in the next sûtra, not so of यल् ॥

३४७९ । पूर्वैः कृतमिनयौ च । ४ । ४ । १३३ ।

'गम्भीरेभिः पथिभिः पूर्विणेभिः' । 'ये ते पन्थाः सवितः पूर्व्यासः' ।

3479. The affixes 'in' and 'ya' as well as 'kh' come in the sense of 'made by them,' after the word 'pûrva' (forefathers), in the Instrumental case in construction.

The ख is read into the sûtra by force of the word च ; the anuvritti of मत्वर्थे ceases. Thus पूर्वैः कृतं=पूर्विणः 'made by the ancestors' i. e. a road. So also पूर्व्यः and पूर्वीणः ॥ The word पूर्वैः in the plural means पूर्वपुरुषैः "past generations, ancestors." These words occur generally in the plural, and mean "roads widened by the forefathers." Thus गम्भीरेभिः पथिभिः पूर्विणेभिः ॥ So also, ये ते पन्थाः सवितः पूर्व्यासः (Rig I. 35. 11). Another reading of this sûtra is पूर्वैः कृतमिनियौ च: the affixes then will be इनि (इन्), and य ; and ख will be drawn in by virtue of च ॥ The examples then will be पूर्विन्; 3rd pl. पूर्विभिः (with इन्), as पथिभिः पूर्विभिः ; or पूर्वीणैः (ख), or पूर्व्यैः (य) ॥

३४८० । अद्भिः संस्कृतम् । ४ । ४ । १३४ ।

यस्येदमप्यं हविः ।

3480. The affix 'yat' comes in the Chhandas, in the sense of sanctified,' after the word 'apas' in the third case in construction.

Thus अप्यम् 'offering purified with water.' As यस्येदमप्यं हविः (Rig Ved. X 86. 12). The case of construction is indicated in the sûtra itself.

३४८१ । सहस्रेण संमितौ घः । ४ । ४ । १३५ ।

'सहस्रियासोऽपां नोर्मयः' । सहस्रेण तुल्या इत्यर्थः ।

3481. The affix 'gha' comes in the Chhandas, in the sense of 'like,' after the word 'sahasra,' in the third case in construction.

The case of construction is indicated by the sûtra. Thus सहस्रेण संमितः = सहस्रियः 'like unto thousand.' As in the following verse :—सहस्रियासोऽपां नोर्मयः (Rig Ved. I 168. 2). The word संमित means तुल्य 'equal to.' Some read the word समित instead of संमित, but the meaning will be the same.

३४८२ । मतौ च । ४ । ४ । १३६ ।

सहस्रशब्दान्मत्वर्थे घः स्यात् । सहस्रमस्यास्तीति सहस्रियः ।

3481. The affix 'gha' comes in the Chhandas, with the force of matup, after the word 'sahasra.'

As सहस्रमस्य विद्यते = सहस्रियः ॥ This debars the मत्वर्थ affixes विनि and इनि and अण् of V. 2. 102 and 103.

३४८३ । सोममर्हति यः । ४ । ४ । १३७ ।

सोम्यो ब्राह्मणः । यज्ञार्ह इत्यर्थः ।

3483. The affix 'ya' comes in the Chhandas, after the word 'Soma,' in the second case in construction, when the sense is that of 'who deserves that.'

Thus सोममर्हति = सोम्यो ब्राह्मणः "The Brâhmaṇa who deserves Soma" i. e. honorable and learned, and worthy of performing sacrifices. The difference between यत् and य is in accent.

अनिगन्तो गतिर्वप्रत्ययान्तेऽञ्चतौ परे प्रकृत्या। 'ये पराञ्चस्तान्'। 'अनिगन्तः' इति किम्। प्रत्यञ्चो यन्तु। कृत्स्वरात्परत्वादयमेव। 'उभिवृण्वयानि कद्रुचो पराचः'। 'वप्रत्यये' किम्। उदञ्चनम्॥

3786. An immediately preceding Gati not ending in 'i' or 'u' retains its original accent before 'añch' when an affix having a 'v' follows.

Thus परा॑ञ्चः in ये पराञ्चस्तान् (Rig Veda I. 164. 19). The accent is acute and optionally svarita by VIII 2. 6. Why do we say 'not ending in इ or उ'? Observe प्रत्यञ्चः, here by VI. 2. 139 the second member retains its original accent. Why do we say 'before an affix व्'? Observe उदञ्चनः। When the nasal of 'añch' is elided, then rule VI. 1. 222 presents itself; but that rule is superseded when a Gati not ending in इ or उ precedes, because the present rule is subsequent. Thus प॑राचः in जहि वृष्ण्यानि कृणुही पराचः (Rig Veda VI. 25. 3). In some texts, the reading is अञ्चतावप्रत्यये। The affix व् is like क्विप् &c., (VI. 1. 67).

३७८७ । न्यधी च । ६ । २ । ५३ ॥

वप्रत्ययान्तेऽञ्चतावनिगन्तावपि न्यधी प्रकृत्या । न्यङ्ङुत्तानः । 'उदात्तस्वरितयोर्यणः–' (३६५७) इति अञ्चतेरकारः स्वरितः । अध्यङ् ॥

3787. The Gatis '*ni*' and '*adhi*' however, retain their original accent before 'añch' followed by a 'v' affix.

Thus न्यङ् । The अ becomes svarita by VIII. 2. 4. S. 3657. So also अ॑ध्यङ् ॥

३७८८ । ईषदन्यतरस्याम् । ६ । २ । ५४ ॥

ईषत्कडारः । ईषदित्ययमन्तोदात्तः । ईषद्भेद इत्यादौ कृत्स्वर एव ॥

3788. The word 'îshat,' when first member of a compound, may optionally preserve its original accent.

Thus ई॑षत्कडारः or ईषत्कडा॑रः । ई॑षत् has acute on the final. But in ईषद्भेदः &c., the Krit-accent will necessarily take place (VI. 2. 139); no option being allowed; because the compounds to which the present rule applies are, on the maxim of pratipadokta, those formed by ईषत् with non-Krit words under II. 2. 7.

३७८९ । हिरण्यपरिमाणं धने । ६ । २ । ५५ ॥

सुवर्णपरिमाणवाचि पूर्वपदं वा प्रकृत्या धने । द्वे सुवर्णे परिमाणमस्येति द्विसुवर्णं । तदेव धनं द्विसुवर्णधनम् । बहुव्रीहावपि परत्वाद्विकल्प एव । 'हिरण्यम्' किम् । प्रस्थधनम् । 'परिमाणम्' किम् । काञ्चनधनम् । 'धने' किम् । निष्कमाला ॥

3789. The first member, denoting the quantity of gold retains optionally its original accent, before the word धन ॥

Thus द्विसुवर्ण॑धनम् or द्विसुवर्णधन॑म् । This is a Karmadhâraya compound द्वे सुवर्णे परिमाणमस्य = द्विसुवर्णं, तदेव धनम् । It may also be treated as a Bahuvrîhi compound, then the accent will be of that compound, as द्वि॑सुवर्णधनः or द्विसुवर्णधनः॑ । Why do we say 'gold'? Observe प्रस्थधनम् । Why do we say 'quantity'? Observe कांचनधनम् । Why do we say 'धन'? Observe निष्कमाला ॥

३७९० । प्रथमोऽचिरोपसंपत्तौ । ६ । २ । ५६ ॥

प्रथमशब्दो वा प्रकृत्याभिनवत्वे । प्रथमवैयाकरणाः । संप्रति व्याकरणमध्येतुं प्रवृत्त इत्यर्थः । प्रथमशब्दः प्रथेरमजन्तः । 'अचिर–' इति किम् । प्रथमो वैयाकरणः ॥

3790. The word 'prathama' when standing first in a compound, retains optionally its original accent, when meaning 'a novice.'

The word अचिरोपसंपत्ति = अचिरोपश्लेष or अभिनवत्वम् । Thus प्रथमवैयाकरणः or प्रथमवैयाकरणः=संप्रतिव्याकरणमध्येतुं प्रवृत्तः 'one who has recently commenced to study Grammar.' The word प्रथम is derived from प्रथ by अमच् (Un V. 68) and by चित् accent the acute falls on the last. Why do we say 'when meaning a Novice?' Observe प्रथमवैयाकरणः (वैयाकरणानामाद्यो मुख्यो वा यः सः) 'the first Grammarian or a Grammarian of the first rank.' It will *always* have acute on the final.

३७९१ । कतरकतमौ कर्मधारये । ६ । २ । ५७ ॥

वा प्रकृत्या । कतरकठः । कर्मधारयग्रहणमुत्तरार्थम् । इह तु प्रतिपदोक्तत्वादेव सिद्धम् ॥

3791. The words कतर and कतम, standing as the first member of a compound, retain optionally their original accent, in a Karmadhâraya.

Thus कतरकठः or कतरकठः, कतमकठः or कतमकठः । The word Karmadhâraya is used for the sake of the next sûtra, this sûtra could have done without it, as 'katara' and 'katama' by the maxim of pratipadokta, form only Karmadhâraya compound, by II. 1. 63.

३७९२ । आर्यो ब्राह्मणकुमारयोः । ६ । २ । ५८ ॥

आर्यकुमारः । आर्यब्राह्मणः । आर्यो ण्यदन्तत्वादन्तस्वरितः । 'आर्यः' किम् । परमब्राह्मणः । 'ब्राह्मणादि—' इति किम् । आर्यक्षत्रियः । कर्मधारय इत्येव ॥

3792. The word 'ârya' optionally retains its original accent in a Karmadhâraya, before the words 'Brâhmaṇa' and 'kumâra.'

Thus आर्यब्राह्मणः or आर्यब्राह्मणः, आर्यकुमारः or आर्यकुमारः । The word आर्य is formed by ण्यत् affix and has svarita on the final. Why do we say 'Ârya' Observe परमब्राह्मणः, परमकुमारः । Why do we say before 'Brâhmaṇa' and 'Kumâra'? Observe आर्यक्षत्रियः । Why 'Karmadhâraya?' Observe आर्यस्य ब्राह्मणः =आर्यब्राह्मणः । According to the Accentuated Text the accent is आर्य (Pro. Bohtlingk).

३७९३ । राजा च । ६ । २ । ५९ ॥

ब्राह्मणकुमारयोः परतो राजा वा प्रकृत्या कर्मधारये । राजब्राह्मणः । राजकुमारः । योगविभाग उत्तरार्थः ॥

3793. The word 'râjan,' retains optionally its accent before the words 'Brâhmaṇa' and 'Kumâra', in a Karmadhâraya.

Thus राजब्राह्मणः or राजब्राह्मणः, राजकुमारः or राजकुमारः । The word राजन् is formed by the affix कनिन् added to राज् (Un. I. 156). But राज्ञो ब्राह्मणः=राजब्राह्मणः where the compound is not Karmadhâraya. The making of this a separate aphorism is for the sake of the subsequent sûtra into which the anuvṛitti of राजन् runs and not that of आर्य ॥

३७९४ । षष्ठी प्रत्येनसि । ६ । २ । ६० ॥

षष्ठ्यन्तो राजा प्रत्येनसि परे वा प्रकृत्या । राजप्रत्येनाः । 'षष्ठी' किम् । अन्यत्र न ॥

3794. The word 'râjan' ending in the Genitive case, optionally retains its accent, before the word 'pratyenas.'

The words राजन् and अन्यतरस्याम् are understood here also. Thus रा॒ज्ञः प्रत्येनाः or राज्ञः प्रत्ये॑नाः । प्रतिगतं एनः पापं यस्य = प्रत्येनस् । The sign of the Genitive is not elided by VI. 3. 21. When आक्रोश is not meant, we have, रा॒जप्रत्ये॑नाः or राजप्रत्ये॑नाः । Why do we say 'ending in the Genitive'? Observe राजा आसौ प्रत्येनाश्च = राजप्रत्येनाः no option.

३७९५ । क्ते नित्यार्थे । ६ । २ । ६१ ॥

क्तान्ते परे नित्यार्थे समासे पूर्वं वा प्रकृत्या । नित्यप्रहसितः । 'कालाः' (६९०) इति द्वितीयासमासोऽयम् । नित्यशब्दस्त्यबन्त आद्युदात्तः । प्रहसित इति थाथादिस्वरेणान्तोदात्तः । 'नित्यार्थे' किम् । मुहूर्तप्रहसितः ॥

3795. A word having the sense of 'always', retains optionally its accent, before a Past Participle in 'kta.'

Thus नि॑त्यप्रहसितः or नित्यप्रहसि॑तः । These are Accusative compounds formed under Rule II. 1. 28. S. 690 ; नित्य is formed by त्यप् affix, added to the upasarga नि (IV. 2. 104 Vârt) ; and has acute on the first, the upasarga retaining its accent, the affix being anudâtta (III. 1. 4). प्रहसित as end-acute by VI. 2. 144. S 3878. Why do we say 'when the first term means always'? Observe मुहूर्तप्रहसि॑तः ॥

NOTE:—In the case of नित्यप्रहसितः &c., the samâsa accent VI. 1. 223 was first set aside by the Accusative Tatpurusha accent VI. 2. 2 ; this in its turn was set aside by क्त accent VI. 2. 144, which is again debarred by the present.

३७९६ । ग्रामः शिल्पिनि । ६ । २ । ६२ ॥

वा प्रकृत्या । ग्रामनापितः । ग्रामशब्द आद्युदात्तः । 'ग्रामः' किम् । परमनापितः । 'शिल्पिनि' किम् । ग्रामरथ्या

3796. The word 'grâma' when first member of a compound, optionally retains its accent, before a word denoting a 'professional man or artisan.'

Thus ग्रा॑मनापितः or ग्रामनापि॑तः, ग्रा॑मकुलालः or ग्रामकुला॑लः । The word ग्राम was acute on the first as it is formed by the affix मनिन् (Un I. 148). Why do he say 'ग्राम'? Observe परमनापि॑तः । Why do we say 'a śilpî, a professional workman'? Observe ग्रामरथ्या ; where there is no option.

३७९७ । राजा च प्रशंसायाम् । ६ । २ । ६३ ॥

शिल्पिवाचिनि परे प्रशंसार्थं राजपदं वा प्रकृत्या । राजनापितः । राजकुलालः । 'प्रशंसायाम्' किम् । राजनापितः । 'शिल्पिनि' किम् । राजहस्ती ॥

3797. The word 'râjan' followed by a profession denoting noun, optionally retains its accent, when praise is to be expressed.

Thus राजनापितः or राजनापितः, राजकुलालः or राजकुलालः: 'A royal barber i. e. a skilful barber or one fit to serve the king even' &c. It may be either a Karmadhârbya or a Genitive compound. Why do we say 'राजन्'? Observe परमनापितः। Why do we say 'when denoting praise'? Observe राजनापितः: 'king's barber.' Why do we say 'a professional man'? Observe राजहस्ती 'a royal elephant.

३७९८ । आदिरुदात्तः । ६ । २ । ६४ ॥

अधिकारोऽयम् ॥

3798. In the following up to VI. 2. 91 inclusive, the phrase 'the first syllable in—(the word standing in the Nominative) has the acute,' is to be always supplied.

This is an adhikâra aphorism. The first syllable of the पूर्वपद will get the acute in the following aphorisms. In short, the phrase 'âdirudâtta' should be supplied to complete the sense of the subsequent sûtras. The word आदि 'the first syllable' is understood upto VI. 2. 91, the word उदात्त has longer stretch: it governs upto VI. 2. 237.

३७९९ । सप्तमीहारिणौ धर्म्येऽहरणे । ६ । २ । ६५ ॥

सप्तम्यन्तं हारिवाचि चाद्युदात्तं धर्म्ये परे । देयं यः स्वीकरोति स हारीत्युच्यते । धर्म्यमित्याचारनियतं देयम् । मुकुटेकार्षापणम् । हलेद्विपदिका । 'संज्ञायाम्' (७२१) इति सप्तमीसमासः । 'कारनाम्नि च-' (९६८) इत्यलुक् । याज्ञिकाश्वः । वैयाकरणहस्ती । क्वचिदयमाचारो मुकुटादिषु कार्षापणादि दातव्यं याज्ञिकादीनां त्वश्वादिरिति । धर्म्ये-' इति किम् । स्तम्बेरमः । 'अहरणे' किम् । वाडवाहरणम् । वडवाया अयं वाडवः । तस्य बीजनिषेकादुत्तरकालं शरीरपुष्ट्यर्थं यद्दीयते तद्धरणमित्युच्यते । परोऽपि कृत्स्वरो हारिस्वरेण बाध्यत इत्यहरण इति निषेधेन ज्ञाप्यते । तेन वाडवहार्यमिति हारिस्वरः सिध्यति ॥

3799. The first member of a compound, if in the Locative case or denoting the name of the receiver of a tax, has acute on the first syllable, when the second member is a word denoting 'what is lawful', but not when it is 'harana.'

The word हारिन् means 'he who appropriates the dues or taxes': and धर्म्यम् means 'the due or tax which has been determined by the custom or usage of the country, town, sect or family, that which one is lawfully entitled to get.' The word धर्म्य is formed by यत् under IV. 4. 91 and 92, and has the sense of both. Of Locative words we have the following examples:—मुकुटे-कार्षापणम्, हले-द्विपदिका। These compounds are formed under II. 1. 44, S. 721 and the sign of the Locative is not elided by VI. 3. 9 and 10, S. 968. With the name of a due-receiver हारी we have the following:—याज्ञिकाश्वः 'the horse which is the customary due of the sacrificer.' So also वैयाकरणहस्ती। In some places the established usage is to give a kârshâpaṇa coin in a Mukuṭa &c or to give a horse to a sacrificer &c. Why do we say 'what is lawful'? Observe स्तम्बेरमः। Why do we say 'but not before हरण'? Observe वाडवहरणम् 'that which is given to a mare.' हरण is that customary food, which is given to a mare, after she has been

covered, in order to strengthen her. The word हरण is a Kṛit-formed word, its exclusion here indicates that other Kṛit-formed words, however, are governed by this rule, when preceded by a हारि denoting word; and thus this sûtra supersedes the Kṛit accent enjoined by VI. 2. 139, so far. Thus वाडवहार्यः has acute on the first by this rule, the subsequent VI. 2. 139 not applying.

**३८०० । युक्ते च । ६ । २ । ६६ ॥**

**युक्तवाचिनि समासे पूर्वमाद्युदात्तम् । गोबल्लवः । 'कर्तव्ये तत्परो युक्तः' ॥**

3800. The first member of a compound has acute on the first syllable, when the second member denotes that by whom the things denoted by the first are regulated or kept in order.

The word युक्त means 'he who is prompt in the discharge of his appointed duty' *i. e.* the person appointed to look after. Thus गोबल्लवः 'a cowherd looking after cow.'

**३८०१ । विभाषाध्यक्षे । ६ । २ । ६७ ॥**

**गवाध्यक्षः ॥**

3801. The acute is optionally on the first syllable when the word अध्यक्ष follows.

Thus गवाध्यक्षः or गवाध्यक्षः 'a superintendent of cows' ॥

**३८०२ । पापं च शिल्पिनि । ६ । २ । ६८ ॥**

**पापनापितः । 'पापाणके-' (७३३) इति प्रतिपदोक्तस्यैव ग्रहणात्षष्ठीसमासे न ॥**

3802. The word 'pâpa' has optionally acute on the first syllable, when followed by a word denoting a professional man.

Thus पापनापितः or पापनापितः ॥ This rule applies to the pratipadokta samâsa of पाप, in the sense of censure, as taught in II. 1. 54. S. 733 when it is an appositional compound; and not when it forms a Genitive compound. Thus पापस्यनापितः=पापनापितः ॥

**३८०३ । गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे । ६ । २ । ६९ ॥**

**भार्यासौश्रुतः । सुश्रुतापत्यस्य भार्याप्रधानतया क्षेपः । अन्तेवासी । कुमारीदाक्षाः । ओदनपाणिनीयाः । कुमार्यादिलाभकामा ये दाक्ष्यादिभिः प्रोक्तानि शास्त्राण्यधीयन्ते त एव क्षिप्यन्ते । भिक्षामाणवः । भिक्षां लप्स्येऽहमिति माणवः । भयब्राह्मणः । भयेन ब्राह्मणः संपद्यते । 'गोत्रादिषु' किम् । दासीश्रोत्रियः । 'क्षेपे' किम् । परमब्राह्मणः ॥**

3803 The first syllable of the first member of a compound has the acute accent before a Patronymic name or a scholar-name, as well as before 'Mâṇava' and 'Brâhmaṇa,' when a reproach is meant.

Thus भार्यासौश्रुतः 'a descendant of Suśruta, under the petticoat government of his wife.' The compounding takes place by the analogy of शाकपार्थिवः । The

above is an example of a Gotra word. Now with scholar names. कुमारीदाक्षाः 'the pupils of Daksha, for the sake of marriage i. e. who study the work of Daksha or make themselves the pupils of Daksha, for the sake of girls.' and कोदनपाणिनीयाः &c. भिक्षामाणवः=भिक्षामस्यलप्स्ये इतिमिति माणवो भवति । भयब्राह्मणः 'he who being a Brâhmaṇa by birth, acts like a Brâhmaṇa not willingly, but through fear of punishment.' भयेन ब्राह्मणः संपद्यते । The compounding is by II. 1. 4 where no other rule applies. Why do we say 'when followed by a Gotra word?' Observe दासीश्रोत्रियाः । Why do we say 'when reproach is meant?' Observe परमब्राह्मणः ॥

३८०४ । अङ्गानि मैरेये । ६ । २ । ७० ॥

मद्यविशेषो मैरेयः । मधुमैरेयः । मधुविकारस्य तस्य मध्वङ्गम् । 'अङ्गानि' किम् । परम मैरेयः । 'मैरेये' किम् । पुष्पासवः ॥

3804. The first syllable of the word preceding 'Maireya' gets the acute, when it denotes the ingredient of the same.

Thus मधुमैरेयः 'the maireya prepared from honey.' Why do we say when denoting 'an ingredient'? Observe परममैरेयः ॥ Why do we say 'before मैरेय?' Observe पुष्पासवः ॥

३८०५ । भक्ताख्यास्तदर्थेषु । ६ । २ । ७१ ॥

भक्तमन्नम् । भिक्षाकंसः । भाजीकंसः । भिक्षादयोऽन्नविशेषाः । 'भक्ताख्याः' किम् । समाशशालयः । समशनं समाश इति क्रियामात्रमुच्यते । 'तदर्थेषु' किम् । भिक्षाप्रियः । बहुव्रीहिरयम् । अत्र पूर्वपदमन्तोदात्तम् ॥

3805. A word denoting food, gets the acute on the first syllable, when standing before a word which denotes a repository suited to contain that.

Thus भिक्षाकंसः, भाजीकंसः, । The words like भिक्षा, भक्त &c. are names of food. Why do we say 'when denoting the name of food'? Observe समाशशालाः dining halls, (the word समाश=समशनं is the name of an 'action' and not of a 'substance'). Why do we say 'tadartheshu suited to contain that'? Observe भिक्षाप्रियः, which is Bahuvrîhi and the first member gets acute on the final.

३८०६ । गोबिडालसिंहसैन्धवेषूपमाने । ६ । २ । ७२ ॥

धान्यगवः । गोबिडालः । तृणसिंहः । सक्तुसैन्धवः । धान्यं गौरिवेति विग्रहः । व्याघ्रादिः गवाकृत्या संनिवेशितं धान्यं धान्यगवशब्देनोच्यते । 'उपमाने' किम् । परमसिंहः ॥

3806. A word denoting the object of comparison gets the acute on the first syllable when standing before गो, बिडाल, सिंह, and सैन्धव ॥

Thus धान्यगवः = धान्यं गौरिव । The compounding takes place by II. 1. 56 the words गो &c, being considered to belong to Vyâghrâdi class, which is an Akṛitigaṇa. The meaning of the compound must be given according to usage and appropriateness. Thus धान्यगवः means गवाकृत्याऽवस्थितं धान्यं । So also गोबिडालः

तृणसिंहः, सक्तुसैन्धवः, । Why do we say 'when denoting the object of comparision'? Observe परमसिंहः ॥

३८०७ । अके जीविकार्थे । ६ । २ । ७३ ॥

अकप्रत्ययान्ते उत्तरपदे जीविकार्थवाचिनि समासे पूर्वपदमाद्युदात्तम् । दन्तलेखकः । यस्य दन्तलेखनेन जीविका । 'नित्यं क्रीडा-' (७११) इति समासः । 'अके' किम् । रमणीयकर्ता । 'जीविकार्थे' किम् । इक्षुभक्षिकां मे धारयसि ॥

3807. The first member of a compound has the acute on the first syllable, when the second-member is a word ending in the affix 'aka,' and the compound expresses a calling by which one gets his living.

Thus दन्तलेखकः = दन्तलेखेन यस्य जीविका । The compounding takes place by II. 2. 17. S. 711. Why do we say when meaning 'means of living'? Observe इक्षुभक्षिकां मे धारयसि । All affixes which ultimately become अक by taking substitutes, are called अक affixes. Thus ण्वुल्, वुन्, &c. are अक affixes (VII. 1. 1). Why do we say 'ending in the affix अक'? Observe रमणीयकर्ता । Here the compounding takes place by II. 2. 17, and the affix तृच् is added in the sense of sport and not of livelihood.

३८०८ । प्राचां क्रीडायाम् । ६ । २ । ७४ ॥

प्राग्देशवासिनां या क्रीडा तद्वाचिनि समासे अकप्रत्ययान्ते परे पूर्वमाद्युदात्तं स्यात् । उद्दालकपुष्पभञ्जिका । 'संज्ञायाम्' (३२८६) इति ण्वुल् । 'प्राचाम्' किम् । जीवपुत्रप्रचायिका । इयमुदीचां क्रीडा । 'क्रीडायाम्' किम् । तव पुष्पप्रचायिका । पर्याये ण्वुच् ॥

3808 A compound the second member of which is a word ending in अक affix, and which denotes the sport of the Eastern people, gets the acute accent on the first syllable.

Thus उद्दालकपुष्पभञ्जिका । These are formed by ण्वुल् affix (III. 3. 109. S. 3286,) and the compounding takes place by II. 2. 17. S. 711. Why do we say 'of the Eastern Folk'? Observe जीवपुत्रप्रचायिका, which is a sport of the Northern People. Why do we say 'when denoting a sport'? Observe तवपुष्पप्रचायिका 'thy turn for &c.' which is formed by ण्वुच् (III. 3. 111) and denotes 'rotation or turn.'

३८०९ । अणि नियुक्ते । ६ । २ । ७५ ॥

अणन्ते परे नियुक्तवाचिनि समासे पूर्वमाद्युदात्तम् । छत्रधारः । 'नियुक्ते' किम् । काण्डलावः ॥

3809. A compound, the second member of which is a word ending in the Krit-affix अण् and which denotes a functionary, gets the acute on the first syllable.

Thus छत्रधारः । Why do we say when meaning 'a functionary'? Observe काण्डलावः ॥

३८१० । शिल्पिनि चाकृञः । ६ । २ । ७६ ॥

शिल्पिवाचिनि समासेऽणन्ते परे पूर्वमाद्युदात्तं स चेदण् कृञः परो न भवति । तन्तुवायः । 'शिल्पिनि' किम् । काण्डलावः । 'अकृञः' किम् । कुम्भकारः ॥

3810. And when such a compound ending in अण् affix denotes the name of a professional man, but not when the second term is कार (derived from कृञ), the acute is on the first syllable of the first word.

Here also the second term ends in अण् affix. Thus तन्तुवायः । Why do we say when denoting 'a work-man or professional person' ? Observe काण्डलावः । Why do we say 'but not when the affix अण् comes after कृ' ? Observe कुम्भकारः ॥

३८११ । संज्ञायां च । ६ । २ । ७७ ॥

अणन्ते परे । तन्तुवायो नाम कृमिः । 'अकृञः' इत्येव । रथकारो नाम ब्राह्मणः ॥

3811. Also when such an upapada compound ending in अण् affix denotes a Name, the acute falls on the first syllable : but not when the second term is कार ॥

Thus तन्तुवायः, 'a kind of insect, spider.' But not so अण् with कृ ; as रथकारः 'the name of a Brâhmaṇa caste.'

३८१२ । गोतन्तियवं पाले । ६ । २ । ७८ ॥

गोपालः । तन्तिपालः । यवपालः । अनियुक्तार्थो योगः । 'गो' इति किम् । वत्सपालः । 'पाले' इति किम् । गोरक्षः ॥

3812. The words गो, तन्ति and यव get the acute on the first syllable when followed by पाल ॥

Thus गोपालः, तन्तिपालः, यवपालः । The word तन्ति is the rope with which calves are tied. (तनु विस्तारे + क्तिच्). This applies to words not denoting a functionary, which would be governed by VI. 2. 75. S. 3809. Why do we say गो &c. ? Observe वत्सपालः । Why do we say 'followed by पाल' ? Observe गोरक्षः ॥

३८१३ । णिनि । ६ । २ । ७९ ॥

पुष्पहारी ॥

3813. A compound ending in the Krit-affix णिनि (इन्) has the acute on the first syllable of the first member.

Thus पुष्पहारिन् ॥

३८१४ । उपमानं शब्दार्थप्रकृतावेव । ६ । २ । ८० ॥

उपमानवाचि पूर्वपदं णिन्यन्ते परे आद्युदात्तम् । उष्ट्रक्रोशी । ध्वाङ्क्षरावी । उपमानग्रहणमस्य पूर्वयोगस्य च विषयविभागार्थम् । 'शब्दार्थप्रकृतौ' किम् । वृकवञ्ची । 'प्रकृतिग्रहणम्' किम् । प्रकृतिरेव यत्रोपसर्गनिरपेक्षा शब्दार्था तत्रैव यथा स्यात् । इह मा भूत् । गर्दभोच्चारी ॥

3814. When the first member of a compound expresses that with which resemblance is denoted, then it has acute on the first

syllable, before a word formed by णिनि affix, only then, when such latter word is a radical without any preposition, and means 'giving out a definite sound like so and so.'

The word उपमान means the object with which something is likened : शब्दार्थ means 'expressing a sound'; प्रकृति means 'root, without any preposition.' Thus उष्ट्रक्रोशिन्, ध्वाङ्क्षरावित्। The word उपमान shows the scope of this sûtra as distinguished from the last. So that; when the first term is an उपमान word, the preceding sûtra will not apply, though the second member may be a णिनि formed word.

When the second term is not a word denoting sound, the rule will not apply. At वृकवञ्चिन्, which retains krit accent (VI. 2. 139).

Why do we say 'a radical word without any preposition'? Observe गर्दभोच्चारिन्। Here the second term radically (*i. e.*, chârin) does not denote sound, but it is with the help of the Preposition उत् that it means sound. The force of एव is that the उपमान words are restricted. Such words get acute on the first syllable *only then*, when the second member is a radical sound-name.

३८१५। युक्तारोह्यादयश्च । ६ । २ । ८१ ॥

आद्युदात्ताः। युक्तारोही। आगतयोधी। क्षीरहोता॥

3815. The compounds yuktârohin &c, have acute on the first syllable.

Thus 1 युक्तारोही, 2 आगतरोही, 3 आगतयोधी, 4 आगतवञ्ची, 5 आगतनर्दी, 6 आगतनन्दी, 7 आगतप्रहारी। These are formed by णिनि affix, and are illustrations of Rule VI. 2. 79. Some say, these declare a restrictive rule with regard to the first and second members of these terms. Thus रोहिन् &c. must be preceded by युक्त &c. and युक्त &c. followed by रोहिन् &c. to make VI. 2. 79 applicable. Thus युक्तरोहिन् though ending in णिनि does not take acute on the first, so युक्ताध्यायिन्। 8 आगतमत्स्या or °मत्स्य, 9 क्षीरहोता, 10 भगिनीभर्ता। The last two are Genitive compounds under Rule II. 2. 9. 11 ग्रामगोधुक्, 12 अश्वत्रिरात्रः, 13 गर्गत्रिरात्रः, 14 व्युष्टत्रिरात्रः, 16 शणपादः (गणपादः), 16 समपादः। All these are genitive compounds. 17. एकशितिपात्=एकः शितिः पादोऽस्य। This is a Bahuvrîhi of three terms. The word एकशितिः is a Taddhitârtha Samâsa (II. 1. 51), and being a Tatpurusha, required acute on the final, as the Tatpurusha accent is stronger. This declares acute on the first. Moreover by VI. 2. 29, this word एकशितिः would have acute on the first as it is a Dvigu ending in a simple vowel. But the very fact that this word is enumerated here, shows that other Dvigu compounds in शिति are not governed by VI. 2. 29, therefore द्विशितिपाद् has acute on ति। The enumeration of the एकशितिपात् further proves by implication that the (एकशितिपात् स्वरवचनं ज्ञापकं निमित्त स्वरबलीयस्त्वस्य) accent for the application of which a case is present is stronger (See Mahâbhâshya II. 1. 1). The class of compounds known as पात्रेसमित &c, (II 1. 48) also belongs to this class.

1 युक्तारोही, 2 आगतरोही, 3 आगतयोधी, 4 आगतवञ्ची 5 आगतनन्दी (आगतनर्दी), 6 आगतप्रहारी, 7 आगतमत्स्यः (आगतमत्स्या), 8 क्षीरहोता, 9 भगिनीभर्ता, 10 ग्रामगोधुक्

11 अश्वत्रिरात्रः 12 गर्गत्रिरात्रः, 13 व्युष्टित्रिरात्रः, 14 शणपादः (शकपादः), 15 एकशितिपात्, 16 पात्रेसंमितादयश्च (पात्रेसमितादयश्च), 17 समपादः ॥

३८१६ । दीर्घकाशतुषभ्राष्ट्रवटं जे । ६ । २ । ८२ ॥

कुटीजः । काशजः । तुषजः । भ्राष्ट्रजः । वटजः ॥

3816. When the first member is a word ending in a long vowel, or is 'kâśa,' tusha, 'bhrâshṭra' or vaṭa, and is followed by 'ja' the acute falls on the first syllable.

Thus कु॑टीजः, का॑शजः, तु॑षजः, भ्रा॑ष्ट्रजः, व॑टजः । These are formed by the affix ड added to जन् (III. 2. 97).

३८१७ । अन्त्यात्पूर्वं बह्वचः । ६ । २ । ८३ ॥

बह्वचः पूर्वस्यान्त्यात्पूर्वं पदमुदात्तं जे उत्तरपदे । उपसरजः । आमलकीजः । 'बह्वचः' किम् । दग्धजानि तृणानि ॥

3817 In a word consisting of more than two syllables, followed by *ja*, the acute falls on the syllable before the last.

Thus उपस॑रजः, आमल॑कीजः, and ब॒डवाजः (though the last two words have upapadas ending in a long vowel, the accent is governed by this sûtra and not the last). Why do we say "a Polysyllabic first member" ? Observe दग्धजानि तृणानि ॥

३८१८ । ग्रामेऽनिवसन्तः । ६ । २ । ८४ ॥

ग्रामे परे पूर्वपदमुदात्तम् । तच्चेन्निवसद्वाचि न । मल्लग्रामः । ग्रामशब्दोऽत्र समूहवाची देवग्रामः । देवस्वामिकः । 'अनिवसन्तः' किम् । दाक्षिग्रामः । दाक्षिनिवासः ॥

3818. Before 'grâma' the first syllable of the first member has acute, when thereby inhabitants are not meant.

Thus म॑ल्लग्रामः । Here ग्राम is equal to समूह 'an assembly'. दे॑वग्रामः=देवस्वामिकः । Why do we say 'when not meaning inhabitants'. Observe दाक्षिग्राम, 'a village inhabited by the decendants of Daksha'.

३८१९ । घोषादिषु च । ६ । २ । ८५ ॥

दाक्षिघोषः । दाक्षिकटः । दाक्षिह्रदः ॥

3819. The first member has acute on the first syllable when followed by *ghosha* &c.

Thus दा॑क्षिघोषः, दा॑क्षिकटः, दा॑क्षिपल्वलः, दा॑क्षिबदरी, दाक्षिवल्लभः, दा॑क्षिह्रदः, दा॑क्षि-पिङ्गलः, दा॑क्षिपिशङ्गः, दा॑क्षिमाला, दाक्षिरक्षा, दा॑क्षिशाला, or ( °रक्षः or °शालः), दा॑क्षि-शिल्पी, दा॑क्ष्यश्वत्थः, दा॑क्षिशाल्मली, कुन्दतृणम्, आ॑श्रममुनिः, दा॑क्षिपुंसा, दा॑क्षिकूटः ॥

Of the above, those which denote places of habitation, there the first members though denoting inhabitants get the acute accent. Some do not read the anuvritti of अनिवसन्तः in this aphorism, others however read it.

1 घोष, 2 कट (घट), 3 वल्लभ (पल्वल), 4 ह्रद, 5 बदरी (बदर), 6 पिङ्गल, 7 पिशङ्ग, 8 माला, 9 रक्षा (रक्षः), 10 शाला (शालः), 11 कूट, 12 शाल्मली, 13 अश्वत्थ, 14 तृण, 15, शिल्पी, 16 मुनि, 17 प्रेक्षा (प्रेक्षाकू ; पुंसा) ॥

syllable, before a word formed by णिनि affix, only then, when such latter word is a radical without any preposition, and means 'giving out a definite sound like so and so.'

The word उपमान means the object with which something is likened : शब्दार्थे means 'expressing a sound'; प्रकृति means 'root, without any preposition.' Thus उँष्ट्रक्रोशिन्, ध्वाँङ्क्षराविन् । The word उपमान shows the scope of this sûtra as distinguished from the last. So that; when the first term is an उपमान word, the preceding sûtra will not apply, though the second member may be a णिनि formed word.

When the second term is not a word denoting sound, the rule will not apply. At वृकवञ्चि॑न्, which retains kṛit accent (VI. 2. 139).

Why do we say 'a radical word without any preposition'? Observe गर्द॑भोच्चारिन् । Here the second term radically (*i. e.*, chârin) does not denote sound, but it is with the help of the Preposition उत् that it means sound. The force of एव is that the उपमान words are restricted. Such words get acute on the first syllable *only then*, when the second member is a radical sound-name.

३८१५ । युक्तारोह्यादयश्च । ६ । २ । ८१ ॥

आद्युदात्ताः । युक्तारोही । आगतयोधी । क्षीरहोता ॥

3815. The compounds yuktârohin &c, have acute on the first syllable.

Thus 1 यु॑क्तारोही, 2 आ॑गतरोही, 3 आ॑गतयोधी, 4 आ॑गतवञ्ची, 5 आ॑गतनर्दी, 6 आ॑गतनन्दी, 7 आगतप्रहारी । These are formed by णिनि affix, and are illustrations of Rule VI. 2. 79. Some say, these declare a restrictive rule with regard to the first and second members of these terms. Thus रोहिन् &c. must be preceded by युक्त &c. and युक्त &c. followed by रोहिन् &c. to make VI. 2. 79 applicable. Thus वक्षारोहि॑न् though ending in णिनि does not take acute on the first, so युक्ताध्यायि॑न् । 8 आगतमत्स्या or °मत्स्य, 9 क्षी॑रहोता, 10 भ॑गिनिभर्त्ता । The last two are Genitive compounds under Rule II. 2. 9. 11 ग्रा॑मगोधुक्, 12 अ॑श्वत्रिरात्रः, 13 ग॑र्गत्रिरात्रः, 14 व्यु॑ष्टत्रिरात्रः, 16 ग॑णपादः (गणपादः), 16 सं॑मपादः । All these are genitive compounds. 17. ए॑कशितिपात्=एकः शितिः पादोऽस्य । This is a Bahuvrîhi of three terms. The word एकशितिः is a Taddhitârtha Samâsa (II. 1. 51), and being a Tatpurusha, required acute on the final, as the Tatpurusha accent is stronger. This declares acute on the first. Moreover by VI. 2. 29, this word एकशितिः would have acute on the first as it is a Dvigu ending in a simple vowel. But the very fact that this word is enumerated here, shows that other Dvigu compounds in शिति are not governed by VI. 2. 29, therefore द्विशिति॑पाद् has acute on ति । The enumeration of the एकशितिपात् further proves by implication that the (एकशितिपात् स्वरवचनं ज्ञापकं निमित्तस्वरबलीयस्त्वस्य) accent for the application of which a case is present is stronger (See Mahâbhâshya II. 1. 1). The class of compounds known as पा॑त्रेसमित &c, (II. 1. 48) also belongs to this class.

1 युक्तारोही, 2 आगतरोही, 3 आगतयोधी, 4 आगतवञ्ची 5 आगतनर्दी
6 आगतप्रहारी, 7 आगतमत्स्यः (आगतमत्स्या), 8 क्षीरहोता, 9 भगिनीभर्त्ता

11 अश्वत्रिरात्रः 12 गर्गत्रिरात्रः, 13 व्युष्टित्रिरात्रः, 14 गणपादः (गणपादः), 15 एकशि[illegible]
16 पात्रेसंमितादयश्च (पात्रेसमितादयश्च), 17 समपादः ॥

३८१६ । दीर्घकाशतुषभ्राष्ट्रवटंजे । ६ । २ । ८२ ॥

कुटीजः । काशजः । तुषजः । भ्राष्ट्रजः । वटजः ॥

3816. When the first member is a word ending in a l[illegible] vowel, or is 'kâśa,' tusha, 'bhrâshṭra' or vaṭa, and is followed [illegible] 'ja' the acute falls on the first syllable.

Thus कुटीजः, काशजः, तुषजः, भ्राष्ट्रजः, वटजः । These are formed by the a[illegible] added to जन् (III. 2. 97).

३८१७ । अन्त्यात्पूर्वं बह्वचः । ६ । २ । ८३ ॥

बह्वचः पूर्वं स्यान्त्यात्पूर्वं पदमुदात्तं जे उत्तरपदे । उपसरजः । आमलकीजः । 'बह्वचः' [illegible] दग्धजानि तृणानि ॥

3817 In a word consisting of more than two syllables, [illegible] lowed by *ja*, the acute falls on the syllable before the last.

Thus उपसरजः, आमलकीजः, and वडवाजः (though the last two words have [illegible] padas ending in a long vowel, the accent is governed by this sûtra and not [illegible] last). Why do we say "a Polysyllabic first member"? Observe दग्ध[illegible] तृणानि ॥

३८१८ । ग्रामेऽनिवसन्तः । ६ । २ । ८४ ॥

ग्रामे परे पूर्वं पदमुदात्तम् । तच्चेन्निवसद्वाचि न । मल्लग्रामः । ग्रामशब्दोऽत्र समूहवाच[illegible] देवग्रामः । देवस्वामिकः । 'अनिवसन्तः' किम् । दाक्षिग्रामः । दाक्षिनिवासः ॥

3818. Before 'grâma' the first syllable of the first memb[illegible] has acute, when thereby inhabitants are not meant.

Thus मल्लग्रामः । Here ग्राम is equal to समूह 'an assembly'. [illegible] स्वामिकः । Why do we say 'when not meaning inhabitants'. Observe दाक्षि[illegible] 'a village inhabited by the decendants of Daksha'.

३८१९ । घोषादिषु च । ६ । २ । ८५ ॥

दाक्षिघोषः । दाक्षिकटः । दाक्षिह्रदः ॥

3819. The first member has acute on the first syllable when followed by *ghosha* &c.

Thus दाक्षिघोषः, दाक्षिकटः, दाक्षि[illegible], [illegible]

Of the above, those which denote places of habitation [illegible] bers though denoting inhabitants get the acute accent. [illegible] anuvritti of अनिवसन्तः in this aphorism, [illegible]

[illegible]), 3 [illegible] ([illegible]), [illegible] 10 [illegible] ([illegible]), 11 [illegible] ([illegible]) [illegible]

३८२० । छात्र्यादयः शालायाम् । ६ । २। ८६ ॥

छात्रिशाला । व्याडिशाला । यदापि शालान्तः समासो नपुंसकलिङ्गो भवति तदापि 'तत्पुरुषे शालायां नपुंसके' (३८५७) इत्येतस्मात्पूर्वं विप्रतिषेधेनायमेव स्वरः । छात्रिशालम् ॥

3820 The words 'chhâtri' &c, get acute on the first syllable when followed by the word 'śâlâ.'

Thus छा॑त्रिशाला, ऐ॑लिशाला, भा॑ण्डिशाला ॥

Where the Tatpurusha compound ending in शाला becomes Neuter, by the option allowed in II. 4. 25; there also in the case of these words, the acute falls on the first syllable of the first term; thus superseding VI. 2. 123. S. 3857 which specifically applies to Neuter Tatpurushas. Thus छा॑त्रिशालम्, ऐ॑लिशालम् ॥

1 छात्रि, 2 पेलि (ऐलि), 3 भाण्डि, 4 व्याडि, 5 आखण्डि, 6 आटि, 7 गामि (गोमि)॥

३८२१ । प्रस्थेऽवृद्धमकर्क्यादीनाम् । ६ । २ । ८७ ॥

प्रस्थशब्द उत्तरपदे कर्क्यादिवर्जितमवृद्धं पूर्वपदमाद्युदात्तं स्यात् । इन्द्रप्रस्थः । 'अवृद्धम्' किम् । दाक्षिप्रस्थः । 'अकर्क्यादीनाम्' इति किम् । कर्कीप्रस्थः । मकरीप्रस्थः ॥

3821. The first member, which has not a Vriddhi in the first syllable, or which is not 'karkî.' &c, gets the acute on the first syllable before 'prastha.'

Thus इ॑न्द्रप्रस्थः । But not in दाक्षिप्रस्थः, which has Vriddhi in the first syllable; nor also in कर्कीप्रस्थः, मघीप्रस्थः &c.

1 कर्की, 2 मघी (मघो), 3 मकरी, 4 कर्कन्धु (कर्कन्धू), 5 शमी, 6 करीर, 7 कन्दुक (कटुक), 8 कवल (कुवल; कूरल), 9 बदरी (बदर) ॥

३८२२ । मालादीनां च । ६ । २ । ८८ ॥

वृद्धार्थमिदम् । मालाप्रस्थः । शोणाप्रस्थः ॥

3822. The first syllable of 'mâlâ' &c, gets the acute when 'prastha' follows.

Thus मा॑लाप्रस्थः, शा॑लाप्रस्थः ॥ This sûtra applies even though the first syllables are Vriddhi vowels. In the word एक and शोणा the letters ए and ओ are treated as Vriddhi (I. 1. 75).

1 माला, 2 शाला, 3 शोणा (शोण), 4 द्राक्षा, 5 क्षाक्षा, 6 क्षामा, 7 काञ्ची, 8 एक, 9 काम, 10 चौमा ॥

३८२३ । अमहन्नवं नगरेऽनुदीचाम् । ६ । २ । ८९ ॥

नगरे परे महन्नवन्वर्जितं पूर्वमाद्युदात्तं स्यात् तच्चेदुदीचां न । ब्रह्मनगरम् । 'अम-' इति किम् । महानगरम् । नवनगरम् । 'अनुदीचाम्' किम् । कार्तिनगरम् ॥

3823. The first member has acute on the first syllable before the word *nagara* but not when it is the word *mahat*, or *nava*, nor when it refers to a city in the lands of the Northern People.

Thus ब्र॑ह्मनगरम् । But not in महानगरम् and नवनगरम्. Why do we say 'but not of Northern People'? Observe नान्दीनगरम् कार्तिनगरम् ॥

३८२४ । अर्मे चावर्णं द्व्यच्त्र्यच् । ६ । २ । ९० ॥

अर्मे परे द्व्यच्त्र्यच्पूर्वमवर्णान्तमाद्युदात्तम् । गुप्तार्मम् । कुक्कुटार्मम् । 'अवर्णम्' किम् । बृहदर्मम् । 'द्व्यच्त्र्यच्' किम् । कपिञ्जलार्मम् । अमहन्नवमित्येव । महार्मम् । नवार्मम् ॥

3824. A word of two or three syllables ending in 'a' or 'â' (with the exception of 'mahâ' and 'nava'). standing before the word 'arma' has acute on the first syllable.

Thus गुप्तार्मम्, कुक्कुटार्मम् । Why do we say 'ending in अ (long or short)?' Observe बृहदर्मम् । Why do we say 'consisting of two or three syllables'? Observe कपिञ्जलार्मम् । The words महा and नव are to be read here also. The rule therefore does not apply to महार्मम् and नवार्मम् ॥

३८२५ । न भूताधिकसंजीवमद्राश्मकज्जलम् । ६ । २ । ९१ ॥

अर्मे परे नैतान्याद्युदात्तानि । भूतार्मम् । अधिकार्मम् । संजीवार्मम् । मद्राश्मयहणं संघातविग्रहीतार्थम् । मद्रार्मम् । अश्मार्मम् । मद्राश्मार्मम् । कज्जलार्मम् ॥

'+ आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम् +' । 'दिवोदासाय दाशुषे' ॥

3825. The following words do not get acute on the first syllable, when standing before 'arma' viz. भूत, अधिक, संजीव, मद्र, अश्मन्, and कज्जल ॥

Thus भूतार्मम्, अधिकार्मम्, संजीवार्मम्, मद्रार्मम्, अश्मार्मम्, मद्राश्मार्मम् (because the sûtra shows the compounding of those words in madrâśmam) कज्जलार्मम् । All these compounds have acute on the final by VI. 1. 223.

*Vârt*:—In the Vedas the words दिवोदास &c., have acute on the first syllable. Thus दिवोदासाय दाशुषे (Rig Veda IV. 30. 20).

३८२६ । अन्तः । ६ । २ । ९२ ॥

अधिकारोऽयम् । प्रागुत्तरपदादिग्रहणात् ॥

3826. In the following sûtras up to VI. 2. 110 inclusive, is to be supplied the phrase 'the last syllable in a word standing in the Nominative case has the acute.'

This is an adhikâra aphorism. In the succeeding sûtras, the last syllable of the first member of a compound gets the acute accent. Thus in the next sûtra the word सर्व gets acute on the final. This adhikâra extends up to VI. 2. 110. inclusive.

३८२७ । सर्वं गुणकार्त्स्न्ये । ६ । २ । ९३ ॥

सर्वशब्दः पूर्वपदमन्तोदात्तम् । सर्वश्वेतः । सर्वमहान् । 'सर्वम्' किम् । परमश्वेतः। आश्रयव्याप्त्या परमत्वं श्वेतस्येति । गुणकार्त्स्न्ये वर्तते । 'गुण–' इति किम् । सर्वसौवर्णः । 'कार्त्स्न्ये' किम् । सर्वेषां श्वेततरः सर्वश्वेतः ॥

3827. The acute is on the final of the word 'sarva,' standing as first member before an attributive word, in the sense of 'whole, through and through.'

Thus सर्वश्वेतः. सर्वश्वेतम् ॥

Why do we say सर्व ? Observe परमश्वेतः, here the attribute of श्वेत pervades through and through the object referred to, but the accent is not on the final of परम् ॥

Why do we say 'attributive word' ? Observe सर्वं सौवर्णः, 'golden', सर्वराजतः 'silvery', which do not denote any attribute in their original state but modification. In fact it is not गुणवाचक here at all, but a विकारवाचक ॥

Why do we use the word 'Kârtsnya or complete pervasion.' Observe सर्वे श्वेततरः = सर्वश्वेतः here the compounding takes place by the elision of the affix तरप् denoting comparison, and as it shows only comparative, not absolute, whiteness, the rule does not apply. Moreover, in this example, the 'kârtsnya' is not that of 'guṇa' but of 'guṇi', not of the 'attribute', but of the 'substance'.

३८२८ । संज्ञायां गिरिनिकाययोः । ६ । २ । ९४ ॥

एतयोः परतः पूर्वमन्तोदात्तम् । अञ्जनागिरिः । मौण्डिनिकायः । 'संज्ञायाम्' किम् । परमगिरिः । ब्राह्मणनिकायः ॥

3828. The last syllable of the first member before *giri* and nikâya has the acute, when the compound is a Name.

Thus अञ्जनागिरिः । The finals of añjana is lengthened by VI. 3. 117. मौण्डिनिकायः । Why do we say 'when it is a Name' ? Observe परमगिरिः, ब्राह्मणनिकायः ॥

३८२९ । कुमार्या वयसि । ६ । २ । ९५ ॥

पूर्वपदमन्तोदात्तम् । वृद्धकुमारी । कुमारीशब्दः पुंसा सहासंप्रयोगमात्रं प्रवृत्तिनिमित्तमुपादाय प्रयुक्तो वृद्धादिभिः समानाधिकरणः । नह्यत्र वय इह गम्यते न कुमारत्वमेव । 'वयसि' किम् । परमकुमारी ॥

3829. The last syllable of the first member gets the acute when the word 'kumâri' follows, the compound denoting age.

Thus वृद्धकुमारी 'an old maid'. The compounding is by II. 1. 57. The word वृद्धा becomes masculine by VI. 3. 42 in the example.

*Q*. The word कुमारी was formed by ङीप् by IV. 1. 20 in denoting the prime of youth, how can this word be now applied to denote old age by being coupled with वृद्धा ; it is a contradiction in terms. *Ans*. The word कुमारी has two senses ; one denoting 'a young maiden' and second 'unmarried virgin'. It is in the latter sense, that the attribute वृद्धा is applied. Why do we say 'when the compound denotes age' ? Observe परमकुमारी ॥

३८३० । उदकेऽकेवले । ६ । २ । ९६ ॥

अकेवलं मिश्रं तद्वाचिनि समासे उदके परे पूर्वमन्तोदात्तम् । गुडोदकम् । स्वरे कृतेऽत्र एकादेशः । 'स्वरितो वानुदात्ते पदादौ' (३६५८) इति पक्षे स्वरितः । 'अकेवले' किम् । शीतोदकम् ॥

3830. Before the word *udaka,* when the compound denotes a mixture, the last syllable of the first member has the acute.

Thus गु॑डोदकम् or गु॒डोदकम् । When we have already made the ड acute by this rule, then the svarita accent may result optionally, by the combination of the acute ड of guḍa and the subsequent grave उ of उदक, by rule VIII. 2. 6. S. 3659. The word अकेवल means mixture. When mixture is not meant, this rule does not apply. As क्षीरोदकम् ॥

३८३१ । द्विगौ क्रतौ । ६ । २ । ९७ ॥

द्विग्वावुत्तरपदे क्रतुवाचिनि समासे पूर्वमन्तोदात्तम् । गर्गत्रिरात्रः । 'द्विगौ' किम् । अतिरात्रः । 'क्रतौ' किम् । बिल्वहोमस्य सप्तरात्रो बिल्वसप्तरात्रः ॥

3831. Before a Dvigu, when the compound denotes a sacrifice, the last syllable of the first member has the acute.

Thus गर्ग॑त्रिरात्रः = गर्गाणां त्रिरात्रः Why do we say 'before a Dvigu compound'? Observe अतिरात्र॑ः (रात्रिमतिक्रान्त इति प्रादिसमासः) which being formed by the Samasânta affix अच् (V. 4. 87) has acute on the final (VI. 1. 163). Why do we say 'when denoting a sacrifice'? Observe बिल्वसप्तरात्रः = बिल्वहोमस्य सप्तरात्रः ॥

३८३२ । सभायां नपुंसके । ६ । २ । ९८ ॥

सभायां परतो नपुंसकलिङ्गे समासे पूर्वमन्तोदात्तम् । गोपालसभम् । स्त्रीसभम् । 'सभायाम्' किम् । ब्राह्मणसेनम् । 'नपुंसके' किम् । राजसभा । प्रतिपदोक्तनपुंसकग्रहणान्नेह । रमणीयसभम् । ब्राह्मणकुलम् ॥

3832. Before the word sabhâ when it is exhibited as Neuter the first member of the compound gets acute on the last syllable.

Thus गोपाल॑सभम्, स्त्री॑सभम् ॥

Why do we say 'before सभा'? Observe ब्राह्मणसेनम् ॥

Why do we say 'when in the Neuter'? Observe राजसभा ॥

The word सभा becomes Neuter under rules II. 4. 23-24 : therefore when the word सभा does not become Neuter under those rules, then by the maxim of Pratipadokta &c :. the accent does not fall on the final of the preceding term, as, रमणीयसभं, here the word सभा is neuter not by the force of any particular rule, but because the thing designated (अभिधेय) is neuter.

३८३३ । पुरे प्राचाम् । ६ । २ । ९९ ॥

देवदत्तपुरम् । नान्दीपुरम् । 'प्राचाम्' किम् । शिवपुरम् ॥

3833. Before the word *pura*, when the compound denotes a city of the Eastern People, the final of the first member has the acute.

Thus देवदत्त॑पुरम्, कार्णि॑पुरम्, नान्दी॑पुरम् । Why do we say of the Eastern people'? Observe शिवपुरम् ॥

३८३४ । अरिष्टगौडपूर्वे च । ६ । २ । १०० ॥

पुरे परेऽरिष्टगौडपूर्वे समासे पूर्वमन्तोदात्तम् । अरिष्टपुरम् । गौडपुरम् । 'पूर्व' ग्रहणं किम् । इहापि यथा स्यात् । अरिष्टाश्रितपुरम् । गौडभृत्यपुरम् ॥

3834. When the words 'arishṭa' and 'gauḍa' stand first, the first member has the acute on the final before the word 'pura.'

Thus अरिष्टपुरम्, गौडपुरम् । By the force of the word पूर्व in the aphorism, we can apply the rule to अरिष्टश्रितपुरम्, गौडभृत्यपुरम् ॥

३८३५ । न हास्तिनफलकमार्देयाः । ६ । २ । १०१ ॥

पुरे परे नैतान्यन्तोदात्तानि । हास्तिनपुरम् । फलकपुरम् । मार्देयपुरम् । मृदोरपत्यमिति शुभ्रादित्वात् ढक् ॥

3835. But when the word 'hâstina' 'phalaka' and 'mârdeya' precede 'pura' the acute does not fall on their final.

This is an exception to VI. 2. 99. Thus हास्तिनपुरम्, फलकपुरम्, मार्देयपुरम्. The son of मृदु is मार्देय formed by ढक्, the word belonging to Śubhrâdi class. The उ is elided by VI. 4. 147.

३८३६ । कुसूलकूपकुम्भशालं बिले । ६ । २ । १०२ ॥

एतान्यन्तोदात्तानि बिले परे । कुसूलबिलम् । कूपबिलम् । कुम्भबिलम् । शालबिलम् । 'कुसूलादि' किम् । सर्पबिलम् । 'बिल' इति किम् । कुसूलस्वामी ॥

3836, The words कुसूल, कूप, कुम्भ, and शाला have the acute on the last syllable before the word 'bila.'

Thus कुसूलबिलम्, कूपबिलम्, कुम्भबिलम्, शालाबिलम्, । But not so in सर्पबिलम् । Why do we say 'before बिल'? Observe कुसूलस्वामी ॥

३८३७ । दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु । ६ । २ । १०३ ॥

दिक्शब्दा अन्तोदात्ता भवन्त्येषु । पूर्वेषुकामशमी । अपरकृष्णमृत्तिका । जनपदः । पूर्वपञ्चालाः । आख्यानम् । पूर्वयायातम् । पूर्वचानराटम् । शब्दग्रहणं कालवाचिदिक्शब्दस्य परिग्रहार्थम् ॥

3837. Words expressing direction (in space or time) have acute on the last syllable, when followed by a word denoting a village, or a country or a narrative, and before the word 'chânarâṭa.'

Thus पूर्वेषुकामशमी or पूर्व॰ (VIII. 2. 6). The compounding takes place by II. 1. 50. अपरकृष्णमृत्तिका ॥

Country name—पूर्व॰ पञ्चालाः । These are Karmadhâraya compounds (II. 1. 58).

Story name :—पूर्वयायातम् । So also पूर्वचानराटम् । The employmen of the term शब्द in the aphorism shows that time-denoting दिक् words as in पूर्वयायात should also be included.

३८३८ । आचार्योपसर्जनश्चान्तेवासिनि । ६ । २ । १०४ ॥

आचार्योपसर्जनान्तेवासिनि परे दिक्शब्दा अन्तोदात्ता भवन्ति । पूर्वपाणिनीयाः । 'आचार्य-' इति किम् । पूर्वान्तेवासी । 'अन्तेवासिनि' किम् । पूर्वपाणिनीयं शास्त्रम् ॥

3838. The direction denoting words have acute on the final

before the names of scholars, when such names are derived from those of their teachers.

Thus पूर्वपाणिनीयाः । Compare VI. 2. 36. Why do we say 'when derived from the names of their Teachers'? Observe पूर्वान्तेवासी । Why do we say 'Scholar-names'? Observe पूर्वपाणिनीयं शास्त्रम् । (पाणिनीयं शास्त्रम् पूर्वं चिरन्तनम्) ॥

३८३९ । उत्तरपदवृद्धौ सर्वं च । ६ । २ । १०५ ॥

उत्तरपदस्येत्यधिकृत्य या वृद्धिर्विहिता तद्वत्युत्तरपदे परे सर्वशब्दो दिक्शब्दाश्चान्तोदात्ता भवन्ति । सर्वपाञ्चालकः । अपरपाञ्चालकः । 'अधिकार' ग्रहणं किम् । सर्वमासः । सर्वकारकः ॥

3839. Words denoting direction and the word 'sarva' have acute on the final, before a word which takes Vṛiddhi in the first syllable of the second term by VII. 3. 12 and 13.

By the sûtra उत्तरपदस्य VII. 3. 10, 12, the Vṛiddhi of the Uttarapada is ordained when the Taddhita affixes having ञ्, ण्, or क्, follow, the Pûrvapada being सु, सर्व and अर्ध । The word उत्तरपदवृद्धिः therefore, means that word which takes Vṛiddhi, under the rule relating to uttarapada, *i. e.*, under rule VII. 3. 12 and 13. Thus अपरपांचालकः, सर्वपाञ्चालकः । These are formed by वुञ् affix (IV. 2. 125).

Why do we say 'which takes Vṛiddhi in the second term under VII. 3. 12 and 13?" Had the word उत्तरपदस्येति अधिकृत्य not been used by us in explaining the sûtra, then the sûtra would have run thus वृद्धौ सर्वं च, and would have applied to cases like सर्वमासः, सर्वकारकः where मासः and कारकः are Vṛiddhi words not by virtue of VII. 3. 12.

३८४० । बहुव्रीहौ विश्वं संज्ञायाम् । ६ । २ । १०६ ॥

बहुव्रीहौ विश्वशब्दः पूर्वपदभूतः संज्ञायामन्तोदात्तः स्यात् । पूर्वपदप्रकृतिस्वरेण प्राप्ते आद्युदात्तस्यापवादः । 'वि॒श्वक॑र्मा वि॒श्वदे॑वः' । । 'आ वि॒श्वदे॑वं सत्प॑तिम्' । 'बहुव्रीहौ' किम् । विश्वे च ते देवाश्च विश्वे देवाः । 'संज्ञायाम्' किम् । विश्वदेवः । प्रागव्ययीभावद्बहुव्रीह्यधिकारः ॥

3840. The word 'viśva' has acute on the final, being first member in a Bahuvrîhi when it is a Name.

This is an exception to VI. 2. 1 by which the first member in a Bahuvrîhi would have retained its original accent. Thus:—विश्वकर्मा विश्वदेवः (Rig Veda VIII. 98. 2). आविश्वदेवं सत्पतिम् ॥

Why do we say in a Bahuvrihi compound? Observe विश्वे च देवाः = विश्वे देवाः ॥

Why do we say when a name? Observe विश्वेदेवा अस्य = विश्वदेवः । But विश्वामित्रः and विश्वाजिनः have acute on the final as they are governed by the subsequent rule VI. 2. 165 which supersedes this. The word Bahuvrihi governs the succeeding sûtras up to VI. 2. 120 inclusive.

३८४१ । उदराश्वेषुषु । ६ । २ । १०७ ॥

संज्ञायामिति वर्तते । वृकोदरः । हर्यश्वः । महेषुः ॥

3841. The first member in a Bahuvrîhi, before the words 'udara' 'aśva' and 'ishu' gets acute on the final syllable, when the compound denotes a Name.

Thus वृको॑दरः, हर्य॑श्वः, and महे॑षुः । This sûtra is also an exception to VI. 2. 1 by which the first term would have retained its original accent. The word वृ॑क has acute on the first by Phiṭ II. 7. The word हरि is also first acute as formed by इन् (Uṇ IV. 118). The word महत् is end-acute by V. 2. 38. Its mention here appears redundant.

३८४२ । क्षेपे । ६ । २ । १०८ ॥

उदराश्वेषुषु पूर्वमन्तोदात्तं बहुव्रीहौ निन्दायाम् । घटोदरः । कटुकाश्वः । चलाचलेषुः अनुदर इत्यत्र 'नञ्सुभ्याम्–' (३९०६) इति भवति प्रतिषेधेन ॥

3842. A word before 'udar' 'aśva' and 'ishu' in a Bahuvrîhi gets acute on the final, when reproach is meant.

Thus घटो॑दरः, कटुका॑श्वः, चलाचले॑षुः । The word घट is formed by अच् (III. 1. 134) and has acute on the final, and so it would have retained this accent by VI. 2. 1. even without this sûtra. The word क॑टुक being formed by कन् (V. 3. 75) has acute on the first. In this and the last sûtra, all the acutes may optionally be changed into svarita by VIII. 2. 6. But अनुद॑रः and सूद॑रः have acute on the final by VI. 2. 172, S. 3906 which being a subsequent sûtra, supersedes this present, so far as अन् and सु are concerned.

३८४३ । नदी बन्धुनि । ६ । २ । १०९ ॥

बन्धुशब्दे परे नद्यन्तं पूर्वमन्तोदात्तं बहुव्रीहौ । गार्गीबन्धुः । 'नदी' किम् । ब्रह्मबन्धुः ब्रह्मशब्द आद्युदात्तः । 'बन्धुनि' किम् । गार्गीप्रियः ॥

3843. In a Bahuvrîhi compound, having the word 'bandhu' as its second member, the first-member ending in the Feminine affix 'î' ('nadî' word) has the acute on its final syllable.

Thus गार्गी॑बन्धुः । The word गा॑र्गी is formed by adding ङीप् (IV. 1. 16) to गार्ग्य ending in यञ् (IV. 1. 105), and therefore, it is first acute. By VI. 2. 1 this accent would have been retained, but for the present sûtra.

Why do we say 'a Nadî (Feminine in ई) word'? Observe ब्र॑ह्मबन्धुः, the word ब्रह्म has acute on the first syllable as it is formed by मनिन् (Uṇ IV. 146) and it retains that accent (VI. 2. 1).

Why do we say 'before बन्धु'? Observe गा॑र्गीप्रियः ॥

३८४४ । निष्ठोपसर्गपूर्वमन्यतरस्याम् । ६ । २ । ११० ॥

निष्ठान्तं पूर्वपदमन्तोदात्तं वा । प्रधौतपादः । 'निष्ठा' किम् । प्रसेवकमुखः । 'उपसर्गपूर्वम्' किम् । शुष्कमुखः ॥

3844. In a Bahuvrîhi compound, a Participle in 'kta' preceded by a preposition, standing as the first member of the com pound, has optionally acute on the last syllable.

Thus प्रधौतपादः or प्रधौतपादः (VI. 2. 169).

Why do we say 'a Nishṭhâ'? Observe प्रसेवकमुखः which is acute in the middle by the kṛit accent being retained after प (VI. 2. 139).

Why do we say 'preceded by a preposition'? Observe शुष्कमुखः which has acute on the first by VI. 1. 206.

३८४५ । उत्तरपदादिः । ६ । २ । १११ ॥

उत्तरपदाधिकार आपादान्तम् । आद्यधिकारस्तु 'प्रकृत्या भगालम्' (३८७९) इत्यवधिकः ॥

3845. In the following sûtras, up to VI. 2. 136 inclusive, should always be supplied the phrase 'the first syllable of the second member has the acute.'

This is an adhikâra aphorism and the word उत्तरपद exerts its influence up to the end of the chapter, while the word आदि has scope up to VI. 2. 187 exclusive.

३८४६ । कर्णो वर्णलक्षणात् । ६ । २ । ११२ ॥

वर्णवाचिनो लक्षणवाचिनश्च परः कर्णशब्द आद्युदात्तो बहुव्रीहौ । शुक्लकर्णः । शंकुकर्णः । 'कर्ण' किम् । श्वेतपादः । 'वर्णलक्षणात्' किम् । शोभनकर्णः ॥

3846. In a Bahuvrîhi compound, the word 'karṇa' standing as second member, has acute on the first syllable, when it is preceded by a word denoting color or mark.

Thus with color we have शुक्लकर्णः and with mark-name, we have शङ्कूकर्णः the lengthening of शंकु takes place by VI. 3. 115. The marks of 'scythe,' 'arrow' &c., are made on the ears of cattle to mark and distinguish them. It is such a 'mark' which is meant here.

Why do we say कर्ण? Observe श्वेतपादः, कूटशृङ्गः here श्वेत being formed by अच् (II. 1. 134) is end-acute, and कूट being formed by क (III. 1. 135) is also end-acute and these accents are retained in the compound.

Why do we say 'when preceded by a word denoting color or mark'? Observe शोभनकर्णः where शोभन being formed by युच् (III. 2. 149) is end-acute and this accent is retained (VI. 2. 1).

३८४७ । संज्ञौपम्ययोश्च । ६ । २ । ११३ ॥

कर्ण आद्युदात्तः । मणिकर्णः । औपम्ये । गोकर्णः ॥

3847. In a Bahuvrîhi, the second member 'karṇa' has acute on the first syllable, when the compound denotes a Name or a Resemblance.

Thus मणिकर्णः, is a Name: गोकर्णः, denotes resemblance *i. e.*, 'persons having ears like a cow.'

३८४८ । कण्ठपृष्ठग्रीवाजङ्घं च । ६ । २ । ११४ ॥

संज्ञौपम्ययोर्बहुव्रीहौ । शितिकण्ठः । काण्डपृष्ठः । सुग्रीवः । नाडीजङ्घः । औपम्ये । खरकण्ठः । गोपृष्ठः । अश्वग्रीवः । गोजङ्घः ॥

3848. In a Bahuvrihi expressing a Name or comparison, the second member कण्ठ, पृष्ठ, ग्रीवा and जङ्घा have acute on the first syllable.

Thus Name : शितिकण्ठः । Comparison खरकण्ठः । Name काण्डपृष्ठः । Resemblance गोपृष्ठ । Name सुग्रीवः । Resemblance अश्वग्रीवः । Name नाडीजङ्घः । Resemblance गोजङ्घः, ॥

The sûtra कण्ठपृष्ठग्रीवाजंघं is in Neuter gender, and जंघा is shortened, as it is a Samâhâra Dvandva. In the case of सुग्रीव, the accent would have fallen on the final व by VI. 2. 172, this ordains acute on ग्री ॥

३८४९ । शृङ्गमवस्थायां च । ६ । २ । ११५ ॥

शृङ्गशब्दो ऽवस्थायां संज्ञौपम्ययोश्चाद्युदात्तो बहुव्रीहौ । उद्गतशृङ्गः । द्व्यङ्गुलशृङ्गः । अत्र शृङ्गोद्गमनादिकृतो गवां देवयोर्विशेषो ऽवस्था । संज्ञायाम् । ऋष्यशृङ्गः । उपमायाम् । मेषशृङ्गः । 'अवस्था-' इति किम् । स्थूलशृङ्गः ॥

3849 In a Bahuvrihi denoting age, (as well as a Name or a Resemblance), the second member 'śriṅga' gets acute on the first syllable.

Thus उद्गतशृङ्गः, द्व्यङ्गुलशृङ्गः । Here the word शृङ्ग denotes the particular age of the cattle at which the horns come out, or become one inch long. Name : ऋष्यशृङ्गः । Comparison : मेषशृङ्गः । Why do we say when denoting 'age &c' स्थूलशृङ्गः ॥

३८५० । नञो जरमरमित्रमृताः । ६ । २ । ११६ ॥

नञः पराण्येते आद्युदात्ता बहुव्रीहौ । 'ता मे जराय्वजरम्' । अमरम् । 'अमित्रमर्दय' । 'अवीर देवेष्वमृतम्' । 'नञः' किम् । ब्राह्मणमित्रः । 'जर-' इति किम् । अशत्रुः ।

3850. After a Negative Particle, in a Bahuvrîhi, the acute falls on the first syllable of जर, मर, मित्र and मृत ॥

Thus अजरः, अमरः, अमित्रः and अमृत । Why do we say after a Negative Particle ? Observe ब्राह्मणमित्रः । Why do we say 'जर &c.' Observe अशत्रुः when the final gets the acute by VI. 2. 172.

३८५१ । सोर्मनसी अलोमोषसी ॥ ६ । २ । ११७ ॥

सोःपरं लोमोषसी वर्जयित्वा मन्नन्तमसन्तं चाद्युदात्तं स्यात् । 'नञ्सुभ्याम्' (३८०६) इत्यस्यापवादः । सु' कर्माणः सुयुज' । 'स नो वक्षदनिमानः सुब्रह्मा । शिवा पशुभ्यः सुमनाः सुवर्चाः' । सुपेशसस्करति' । 'सोः' किम् । कृतकर्मा । 'मनसी' किम् । सुराजा । 'अलोमोषसी' किम् । सुलोमा । सूषाः । कपि तु परत्वात् 'कपि पूर्वम्' (३८०७) इति भवति । सुकर्मकः । 'सु स्रोतस्कः' ॥

3851. After the adjective *su* in a Bahuvrîhi, a stem ending in *man* and *as* with the exception of *loman* and *ushas* has acute on the first syllable.

Thus सुकर्माणः सुरुचः (Rig Veda IV. 2. 17). सु नो यज्ञनिमानः सुवक्षा (Rig Veda VI. 22. 7). शिवा पशुभ्यः सुमनाः सुवर्चाः (Rig Veda X. 85. 44). सु पेशसस्करति (Rig Veda II 35. 1). सुकर्मन्, सुधर्मन् सुप्रथिमन्, सुपयस्, सुयशस्, सुस्रोतस्, so also सुध्वत् and सुध्वंत् from the root ध्वंस् and ध्वस् with the affix क्विप्। The final स् is changed to द् by VIII. 2. 72. But this substitution is considered asiddha for the purposes of accent, and these words are taken as if still ending in अस्। Why do we say 'after सु?' Observe कृतकर्मन्, कृतयशस्। Why do we say 'ending in मन् and अस्?' Observe सुराजन् and सुतक्षन् formed by the affix कनिन् (Uṇ. I. 156), and the accent is on र and त, but with सु, the accent is thrown on the final by VI. 2, 172 S. 3906. Why do we say with the exception of लोमन् and उषस्? Observe सुलोम॑न and सु॒षस (VI. 2. 127). The following maxim applies here: अनिनस्मन् ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति 'whenever अन्. or इन् or अस् or मन्, when they are employed in Grammar, denote by I. 1. 72, something that ends with अन् or इन् or अस् or मन्, there (अन्, इन्, अस् and मन्) represent these combinations of letters, both in so far as they possess and also in so far as they are void of, a meaning.' Therefore the मन् and अस् void of meaning are also included here. Thus धर्मन् is formed by मन् (Uṇ I. 140), but कर्मन् is is formed by मनिन् (Uṇ. IV. 145), and प्रथिमन् is formed by इमनिच् affix (V. 1. 122) in which मन् is only a part. Similarly अप्सस् is formed by असुन् (Uṇ IV. 191), and so also स्रोतस् (Uṇ IV. 202); but in सुध्वंस् (सुध्वस् from ध्वंस् with the affix क्विप् III. 2. 76) the rule applies also, though अस् is here part of the root. But when the samâsânta affix कप् is added (V. 4. 154), then the accent falls on the syllable immediately preceding कप् for there the subsequent Rule VI. 2. 173 S, 3907 supersedes the present rule: thus सुकर्म॑कः, सुस्रो॑तस्कः॥

३८५२। क्रत्वादयश्च। ६। २। ११८॥

सोः परे आद्युदात्ताः स्युः। 'त्वाम्॑ आव्याय सुक्रतुः'। 'सु प्रती॑कः'। 'सु हव्यः'। 'सु प्रतू॑र्तिम् अने॑हसम्'।

3852. After *su* in a Bahuvrîhi, the acute falls on the first syllable of *kratu* &c.

Thus त्वामाव्याय सुक्रतुः (Rig Veda I. 25. 10) सुहव्यः, सुप्रतीकः। सुप्रतूर्तिमनेहसम् (Rig Veda I. 40. 4).

३८५३। आद्युदात्तं द्व्यच्छन्दसि। ६। २। ११९॥

यदाद्युदात्तं द्व्यच्तत्सोरुत्तरं बहुव्रीहावाद्युदात्तम्। 'अधा स्वश्वाः'। 'सु रथाँ आतिथिग्वे' नित्स्वरेणाश्वरथावाद्युदात्तौ। 'आद्युदात्तम्' किम्। 'यासुबाहुः'। 'द्व्यच्' किम्। सु गुरसत् हिरण्यः। हिरण्यशब्दस्त्र्यच्॥

3853. In a Bahuvrîhi compound, in the Chhandas, a word of two syllables with acute on the first syllable, when preceded by *su*, gets acute on the first syllable.

In other words, such a word retains its accent. Thus:—अधास्वश्व सु रथाँ आतिथिग्वे (Rig Veda VIII. 68. 16). Here स्व॑श्वः and सुर॑थः have acute on अ and र, which they had originally also, for अश्व and रथ are formed by क्विन् (Uṇ. I. 151) and क्थन् (Uṇ. II. 2) respectively and have the नित् accent (VI. 1. 197).

Why do we say 'having acute on the first syllable'? Observe मा शुक्र भूः स्वभूतिः (Rig. II. 32. 7). Here बाहु has acute on the final (Up. I. 27 formed by कु affix and has the accent of the affix III. 1. 3).

Why do we say 'having two syllables'? Observe सुगुरसत्, सुहिरण्यः (Rig Veda I. 125. 2). This sûtra is an exception to VI. 2. 172.

३८५४ । वीरवीर्यौ च । ६ । २ । १२० ॥

सोः परौ बहुव्रीहौ छन्दस्याद्युदात्तौ । 'सुवीरेण रयिणा' । 'सुवीर्यस्य गोमतः' । वीर्यशब्दो यत्प्रत्ययान्तः । तत्र 'यतोऽनावः' (३७०१) इत्याद्युदात्तत्वं नेति वीर्यग्रहणं ज्ञापकम् । तत्र हि सति पूर्वेणैव सिद्धं स्यात् ॥

3854. In a Bahuvrîhi compound in the Chhandas, after 'su' the words 'vrîa' and 'vrîya' have acute on the first syllable.

Thus सुवीरेण रयिणा (Rig Veda X. 122. 3). So also सुवीर्यस्य गोमतः (Rig Veda VIII. 95. 4). The word वीर्य is formed by यत् affix and by VI. 1. 213, S. 3701 it would have acute on the first. But its enumeration in this sûtra shows that Rule VI. 1. 213, does not apply to वीर्य । The word वीर्य has svarita on the final in the Chhandas, by Phit IV. 9. In the classical literature it is âdyudâtta.

३८५५ । कूलतीरतूलमूलशालाक्षसममव्ययीभावे । ६ । २ । १२१ ॥

उपकूलम् । उपतीरम् । उपतूलम् । उपमूलम् । उपशालम् । उपाक्षम् । सुषमम् । निःषमम् । तिष्ठद्गुप्रभृतिष्वेते । 'कूलादि' ग्रहणं किम् । उपकुम्भम् । 'अव्ययीभावे' किम् । परमकूलम् ॥

3855. In an Avyayîbhâva compound, the following second terms have acute on their first syllable : कूल, तीर, तूल, मूल, शाला, अक्ष and सम ॥

Thus उपकूलम्, उपतीरम्, उपतूलम्, उपमूलम्, उपशालम्, सुषमम्, निःषमम् । These last four are to be found in Tishṭhadgu class of compounds (II. 1. 17).

Why do we say 'कूल &c.'? Observe उपकुम्भम् ॥

Why do we say 'in an Avyayîbhâva compound?' Observe परमकूलम्, उत्तमकूलम् । After the prepositions परि, प्रति, उप and अप, the words कूल &c. would have becomes accentless by VI. 2. 33, the present sûtra supersedes VI. 2. 33, and we have accent on कूल &c. and not on the Prepositions.

३८५६ । कंसमन्थशूर्पपाय्यकाण्डं द्विगौ । ६ । २ । १२२ ॥

द्विकंसः । द्विमन्थः । द्विशूर्पः । द्विपाय्यम् । द्विकाण्डम् । 'द्विगौ' किम् । परमकंसः ॥

3856. In a Dvigu Compound the following second members get acute on their first syllable :—कंस, मन्थ, शूर्प, पाय्य and काण्ड ॥

Thus द्विकंसः, (द्वाभ्यां कंसाभ्यां क्रीतः the affix टिठन् V. 1. 25 is elided by V. 1. 28) द्विमन्थः, (the affix ठञ् V. 1. 19 is elided by V. 1. 28) द्विशूर्पः, (the affix अञ् V. 1. 26 is elided) द्विपाय्यः, द्विकाण्डः । Why do we say in a Dvigu? Observe परमकंसः ॥

३८५७ । तत्पुरुषे शालायां नपुंसके । ६ । २ । १२३ ॥

शालाशब्दान्ते तत्पुरुषे नपुंसकलिङ्गे उत्तरपदमाद्युदात्तम् । ब्राह्मणशालम् । 'तत्पुरुषे' किम् । दृढशालं ब्राह्मणकुलम् । 'शालायाम्' किम् । ब्राह्मणशाला ॥

3857. **The word 'śâlâ' at the end of a Tatpurusha compound when exhibited in the Neuter, has acute on the first syllable.**

Thus ब्राह्मणशालम् । The compound becomes Neuter by II. 4. 25.

Why do we say 'in a Tatpurusha'? Observe दृढशालं ब्राह्मणकुलम् which is a Bahuvrîhi compound and therefore the first member retains its accent (VI. 2. 1,) and as the first member is a Nishṭhâ word, it has acute on the final.

Why do we say 'the word शाला?' Observe ब्राह्मणसेनम् ॥

Why do we say 'in the Neuter'? Observe ब्राह्मणशाला । Compare VI. 2. 86.

३८५८ । कन्था च । ६ । २ । १२४ ॥

तत्पुरुषे नपुंसकलिङ्गे कन्थान्तमुत्तरपदमाद्युदात्तम् । सौशमिकन्थम् । आह्वरकन्थम् । 'नपुंसके' किम् । दाक्षिकन्था ॥

3858. **In a Neuter Tatpurusha ending in 'kanthâ' the acute falls on the first syllable of the second member.**

Thus सौशमिकन्थम्, आह्वरकन्थम्, । The word सौशमिः denotes the descendant of सुशमः (शोभनः शमो यस्य) आह्वर is formed by the preposition आ with the verb ह्वृ and the affix क (III. 1. 136) The compound is Neuter by II. 4. 20. These are Genitive compounds. When the word is not Neuter we have दाक्षिकन्था ॥

३८५९ । आदिश्चिहणादीनाम् । ६ । २ । १२५ ॥

कन्थान्ते तत्पुरुषे नपुंसकलिङ्गे चिहणादीनामादिरुदात्तः । चिहणकन्थम् । मद्रकन्थम् चे आदिरिति वर्तमाने पुनरादिग्रहणं पूर्वपदस्याद्युदात्तार्थम् ॥

3859. **In a Neuter Tatpurushâ ending in 'kanthâ' the first syllable of 'chihaṇa' &c. have the acute.**

As चिहणकन्थम्, मड्डरकन्थम्, मद्रुरकन्थम् । The repetition of the word आदि if this sûtra, though its anuvritti was present, indicates that the first syllable on the *first member* gets the acute. The word चिहण is derived from the root चिनोति with क्विप् which gives चित् and हन is formed by adding अच् (III. 1. 134) to हन् । चित्+हन = चिहण the elision of त् is irregular.

३८६० । चेलखेटकटुककाण्डं गर्हायाम् । ६ । २ । १२६ ॥

चेलादीन्युत्तरपदान्याद्युदात्तानि । पुत्रचेलम् । नगरखेटम् । दधिकटुकम् । प्रजाकाण्डम् । चेलादिसादृश्येन पुत्रादीनां गर्हा । व्याघ्रादित्वात्समासः । 'गर्हायाम्' किम् । परमचेलम् ॥

3860. **The words चेल, खेट, कटुक and काण्ड at the end of a Tatpurusha have acute on the first syllable, when a reproach is meant.**

Thus पुत्रचेलम्, नगरखेटम्, (खेट इति तृणनाम, तद्वत् दुर्बल) दधिकटुकम् (कटुकम स्वादु) प्रजाकाण्डम् । The reproach is denoted of the sons &c. by comparing them to चेल &c. The analysis will be पुत्रश्चेलमिव i. e. चेलवत् तुच्छम् and the compounding

takes place under II. 1. 56: the Vyaghrâdi class being an akṛtigaṇa. When reproach is not meant, we have परमचेलम् ॥

३८६१ । चीरमुपमानम् । ६ । २ । १२७ ॥

वस्त्रं चीरमिव वस्त्रचीरम् । कम्बलचीरम् । 'उपमानम्' किम् । परमचीरम् ॥

3861. The word 'chîra' at the end of a Tatpurusha, has acute on the first syllable, when something is compared with it.

Thus वस्त्रम् चीरमिव=वस्त्रचीरम्, कम्बलचीरम् । Why do we say 'when comparison is meant?' Observe परमचीरम् ॥

३८६२ । पललसूपशाकं मिश्रे । ६ । २ । १२८ ॥

घृतपललम् । घृतसूपः । घृतशाकम् । 'भक्ष्येण मिश्रीकरणम्' (६९७) इति समासः । 'मिश्रे' किम् । परमपललम् ॥

3862. In a Tatpurusha ending in पलल, सूप and शाक the acute falls on the first syllable of these, when the compound denotes a food mixed or seasoned with something.

Thus घृतपललम्, घृतसूपः, घृतशाकम् = घृतेन मिश्रं पलल' &c. The compounding takes place by II. 1. 35. S. 697. Why do we say 'when meaning mixed or seasoned?' Observe परमपललम् ॥

३८६३ । कूलसूदस्थलकर्षाः संज्ञायाम् । ६ । २ । १२९ ॥

आद्युदात्तास्तत्पुरुषे । दाक्षिकूलम् । शाण्डिसूदम् । दाण्डायनस्थलम् । दाक्षिकर्षः । ग्रामसंज्ञा एताः । 'संज्ञायाम्' किम् । परमकूलम् ॥

3863. The words कूल, सूद, स्थल and कर्ष have acute on their first syllable, when at the end of a Tatpurusha denoting a Name.

Thus दाक्षिकूलम् शाण्डिसूदम्, दाण्डायनस्थलम्, दाक्षिकर्षः । All these are names of villages. When not a name we have परमकूलम् ॥

३८६४ । अकर्मधारये राज्यम् । ६ । २ । १३० ॥

कर्मधारयवर्जिते तत्पुरुषे राज्यमुत्तरपदमाद्युदात्तम् । ब्राह्मणराज्यम् । 'अक-' इति किम् । परमराज्यम् ॥

'+चेलराज्यादिस्वरादव्ययस्वरः पूर्वविप्रतिषेधेन+' । कुचेलम् । कुराज्यम् ॥

3864. The word 'râjyam' has acute on the first syllable, when at the end of a Tatpurusha compound, which is not a Karmadhâraya.

Thus ब्राह्मणराज्यम् । In a Karmadhâraya we have परमराज्यम् ॥

*Vârt:*—The accent taught in VI. 2. 126 to 130 S 3860 to 3864 is superseded by the accent of the Indeclinable taught in VI. 2. 2, though that rule stands first and this subsequent'. As कुचेलम्, कुराज्यम् ॥

३८६५ । वर्ग्यादयश्च । ६ । २ । १३१ ॥

अर्जुनवर्ग्यः । वासुदेवपक्ष्यः । अकर्मधारय इत्येव । परमवर्ग्यः । वर्ग्यादिर्दिगाद्यन्तर्गणः ॥

3865. At the end of a non-Karmadhâraya Tatpurusha compound, the words *vargya* &c. have acute on the first syllable.

Thus वासुदेववर्ग्यः, वासुदेवपक्ष्यः । In a Karmadhâraya we have परमवर्ग्यः । The words वर्ग्य &c. are no where exhibited as such; the primitive words वर्ग, पूग, गण &c. sub-division of दिगादि (IV. 3. 54) are here referred to, as ending with यत् affix.

३८६६ । पुत्रः पुम्भ्यः । ६ । २ । १३२ ॥

पुम्भ्यः परः पुत्रशब्द आद्युदात्तस्तत्पुरुषे । दाशकिपुत्रः । माहिषपुत्रः । 'पुत्रः' किम् ? कौनटिमातुलः । 'पुम्भ्यः' किम् ? दासीपुत्रः ॥

3866. The word *putra* coming after a Masculine noun in a Tatpurusha has acute on the first syllable.

Thus दाशकिपुत्रः, माहिषपुत्रः । Why do we say 'a पुत्र'? Observe कौनटिमातुलः । Why do we say 'after a masculine word'? Observe दासीपुत्रः ॥

३८६७ । नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः । ६ । २ । १३३ ॥

एभ्यः पुत्रो नाद्युदात्तः । [आख्याग्रहणात्पर्यायाणां तद्विशेषाणां च ग्रहणम् ।] आचार्यपुत्रः । उपाध्यायपुत्रः । शाकटायनपुत्रः । राजपुत्रः । ईश्वरपुत्रः । नन्दपुत्रः । ऋत्विक्पुत्रः । याजकपुत्रः । होतुःपुत्रः । संयुक्ताः संबन्धिनः । श्यालपुत्रः । ज्ञातयो मातापितृसंबन्धेन बान्धवाः । ज्ञातिपुत्रः । भ्रातुःपुत्रः ॥

3867. The word *putra* has not acute on the first syllable when preceded by a word which falls under the category of teachers, kings, priests, wife's relations, and agnates and cognates.

The word आचार्य means 'teacher,' राजा 'prince, king', ऋत्विज् 'a sacrificing priest', संयुक्त 'relations through the wife's side' as श्याला 'brother-in-law' &c. ज्ञाति means 'all kinsmen related through father and mother or blood-relations.' The word आख्या shows that the rule applies to the synonyms of 'teacher' &c., as well as to particular 'teacher' &c. Thus आचार्यपुत्रः, उपाध्यायपुत्रः, शाकटायनपुत्रः राजपुत्रः, ईश्वरपुत्रः, नन्दपुत्रः, ऋत्विक्पुत्रः, याजकपुत्रः, होतुःपुत्रः, (VI. 3. 23) संयुक्तपुत्रः संबन्धिपुत्रः, श्यालकपुत्रः, ज्ञातिपुत्रः, भ्रातुष्पुत्रः, (VI. 3. 23). Here the special accent of पुत्र taught in the last sûtra being prohibited, the accent falls on the last syllable by the general rule VI. 1. 223.

३८६८ । चूर्णादीन्यप्राणिषष्ठ्याः । ६ । २ । १३४ ॥

एतानि अप्राणिषष्ठ्यन्तात्पराण्याद्युदात्तानि तत्पुरुषे । मुद्गचूर्णम् । 'अप्र-' इति किम् ? मत्स्यचूर्णम् ॥

3868. The words 'chûrṇa' &c. in a Tatpurusha compound have acute on the first syllable, when the preceding word ends in a Genitive and does not denote a living being.

Thus मुद्गचूर्णम्, मसूरचूर्णम्, but मत्स्यचूर्णम् where the first term is a living being, and परमचूर्णम् where it is not Genitive. Another reading of the sûtra is चूर्णादीन्यप्राण्युपग्रहात्, the word उपग्रह being the ancient name of षष्ठी given by old Grammarians.

1 चूर्ण, 2 करिव, 3 करिप, 4 शाकिन, 5 शाकट, 6 द्राक्षा, 7 तूस्त, 8 कुन्दुम (कुन्दम), 9 दलप, 10 चमसी, 11 चक्कन (चकन चक्वन) 12 चौल ॥

The word चूर्ण is derived f om the root चूरी दाहे (Div 50) with the affix क्त; करिव and करिप are formed with the upapada करि and the verbs वा 'to go' and पा 'to protect' respectively, and the affix क (करिणं वाति = करिव) (III. 2. 3); शक with the affix इनच् added diversely (Un II. 56); शक with अटच् (Un IV. 81) gives शकट; this with अण् (तद्वहति) gives शाकट; द्राक् क्षरति = द्राक्षा (Prishodarâdi); तुस् (शब्दे) with क्त gives तूस्त the penultimate being lengthened; the word कुन्दु is formed by the affix क्विप added to the root दु with the upapada कु (कु दुनोति कुत्सितं वा दुनोति) the augment मुम् being added to कु। कुन्दु मिमीते = कुन्दुमः। दल with the affix कपन् gives दलपः, चम with असच् forms चमस, then is added ङीप्; चक्कन is formed by अच् (III. 1. 134) added to कन् and reduplication, चोलस्यापत्यं = चौलः ॥

३८६९। षट् च काण्डादीनि। ६। २। १३५॥

अप्राणिषष्ठ्या आद्युदात्तानि। दर्भकाण्डम्। दर्भचीरम्। तिलपललम्। मुद्गसूपः। मूलकशाकम्। नदीकूलम्। 'षट्' किम्। राजसूदः। 'अप्र-' इति किम्। दत्तकाण्डम् ॥

3869. The six words काण्ड, चीर, पलल, सूप, शाक and कूल of Sûtras VI. 2. 126-129 preceded by a non-living genitive word have acute on the first syllable.

As दर्भकाण्डम्, दर्भचीरम्। In the last example चीर is not used as a comparison, that case being governed by VI. 2. 127, तिलपललम्, मुद्गसूपः, मूलकशाकम्। Here पलल, सूप and शाक do not denote mixing, which is governed by VI 2. 128. नदीकूलम्, here the compound does not denote a Name, which would be the case under VI. 2. 129. Why these 'six' only? Observe राजसूदः ॥ Why 'non-living'? Observe दत्तकाण्डम् ॥

३८७०। कुण्डं वनम्। ६। २। १३६॥

कुण्डमाद्युदात्तं वनवाचिनि तत्पुरुषे। दर्भकुण्डम्। कुण्डशब्दोऽत्र सादृश्ये। 'वनम्' किम्। मृत्कुण्डम् ॥

3870. The word 'kuṇḍa' at the end of a Tatpurusha compound denoting 'a wood or forest', has acute on the first syllable.

The word कुण्ड here denotes 'a wood' by metaphor. Thus दर्भकुण्डम्। Why do we say when denoting 'a wood'? Observe मृत्कुण्डम् ॥

३८७१। प्रकृत्या भगालम्। ६। २। १३७॥

भगालवाच्युत्तरपदं तत्पुरुषे प्रकृत्या। कुम्भीभगालम्। कुम्भीनदालम्। कुम्भीकपालम्। मध्योदात्ता एते। प्रकृत्येत्यधिकृतम् 'अन्तः' (३८७७) इति यावत् ॥

3871. The word 'bhagâla' at the end of a Tatpurusha, preserves its original accent.

The synonyms of भगाल are also included. As कुम्भीभगालम्, कुम्भीकपालम्, कुम्भीनदालम्। The words भगाल &c., have acute on the middle. Phit II. 9. The word प्रकृत्या governs the subsequent sûtras up to VI. 2. 143. S. 3877.

३८७२ । शितेर्नित्याबह्वज्बहुव्रीहावभसत् । ६ । २ । १३८ ॥

शितेः परं नित्याबह्वज्कं प्रकृत्या । शितिपादः । शित्यंसः । पादशब्दो वृषादित्वादाद्युदात्तः । अंसशब्दः प्रत्ययस्य नित्त्वात् । 'शितेः' किम् । दर्शनीयपादः । 'अभसत्' किम् । शितिभसत् । शितिराद्युदात्तः । पूर्वपदप्रकृतिस्वरापवादोऽयं योगः ॥

3872. After 'śiti' a word retains in a Bahuvrîhi its original accent, when it is always of not more than two syllables, with the exception of 'bhasad.'

Thus शितिपादः, शित्यंसः । The word पाद belongs to वृषादि class (VI. 1 203) and has acute on the first, and अंसः being formed by सन् (Uṇ V. 21) affix has acute on the first (VI. 1. 197).

Why do we say 'after शिति' ? Observe दर्शनीयपादः which being formed by the affix अनीयर् has acute on the penultimate syllable नी by VI. 1. 217 ॥

Why do we say 'with the exception of भसत्' ? Observe शितिभसत् । The word शिति has acute on the first syllable (Phiṭ II. 10). This sûtra is an exception to VI. 2. 1.

३८७३ । गतिकारकोपपदात्कृत् । ६ । २ । १३९ ॥

एभ्यः कृदन्तं प्रकृतिस्वरं स्यात्तत्पुरुषे । प्रकारकः । प्रहरणम् । 'शोणा धृष्णू नृवाहसा' । इध्मप्रव्रश्चनः । उपपदात् । ईषत्करः । 'गति' इति किम् । देवस्य कारकः । शेषे षष्ठी । कृद्ग्रहणं स्पष्टार्थम् । प्रपचतितरामित्यत्र तरबाद्यन्तेन समासे कृते आम् । तत्र सतिशिष्टत्वादाम्स्वरो भवतीत्येके । प्रपचतिदेश्यार्थं तु कृद्ग्रहणमित्यन्ये ॥

3873. In a Tatpurusha, a word ending in a Kṛit-affix preserves its original accent, when preceded by an Indeclinable called Gati (I. 4. 60), or a noun standing in intimate relation to a verb (Kâraka), or any word which gives occasion for compounding (Upapada see III. 1. 92).

Thus प्रकारकः, प्रहरणम् । शोणा धृष्णू नृवाहसा (Rig Veda I. 6. 2). The compounding is here by II 2. 18. With kâraka-word we have :—इध्मप्रव्रश्चनः (III. 3. 117). With upapada words, we have :—ईषत्करः । All these are formed by कित् affixes and the accent is governed by VI. 1. 193. *i.e.*, the word व्रश्चन is formed by ल्युट् (इध्मं प्रवृश्च्यते येन) ।

Why do we say 'after a Gati, Kâraka, or an Upapada word ?" Observe देवस्यकारकः = देवकारकः । Here the Genitive in देव does not express a kâraka relation. The genitive is here a शेष लक्षणा षष्ठी denoting a possessor and not a कर्मलक्षणा one : for had it been the latter, there would have been no compounding at all, by II. 2. 16 see also II. 3. 65.

The word कृत् is employed in the sûtra for the sake of distinctness ; for a gati, karaka or upapada could not be followed by any other word than a kṛit-formed word, if there was to be a samâsa. For two sorts of affixes come after a root (dhâtu) namely तिङ् and कृत् । A samâsa can take place with kṛit-formed words, but not with tiṅanta words. So that without employing कृत् in the sûtra, we

could have inferred that कृत् was meant. Therefore, it is said the 'Kṛit' is employed in the sûtra for the sake of distinctness. According to this view we explain the accent in प्रपचतितराम्, प्रपचतितमाम्, by saying that first compounding takes place with प्र and the words पचतितर and पचतितम ending in तरप् and तमप् and then आम्, is added and the accent of the whole word is regulated by आम् by the rule of अतिशायने (see V. 3. 56. and V. 4. 11). According to others, the कृत is taken in this sutra, in order to prevent the gati accent applying to verbal compounds in words like प्रपचति देश्यः, or प्रपचति देशीयं (V. 3 67), or प्रपचतिकल्पम् (V. 3 66). The accent of these will be governed by the rule of the Indeclinable first term retaining its accent.

**३८७४ । उभे वनस्पत्यादिषु युगपत् । ६ । २ । १४० ॥**

एषु पूर्वोत्तरपदे युगपत्प्रकृत्या । 'वनस्पतिं वन आ' । 'बृहस्पतिं यः' । बृहच्छब्दोऽन्त्योदात्तो निपात्यते । 'हर्षया शचीपतिम्' । शार्ङ्गरवादित्वादाद्युदात्तः शचीशब्दः । 'शचीभिर्न' इति दर्शनात् । 'तनूनपादुच्यते' । 'नराशंसं वाजिनम्' । निपातनाद्दीर्घः । 'शुनःशेपम्' ॥

3874. In *vanaspati*, &c, both members of the compounds preserve their original accent simultaneously.

NOTE :—Thus वनस्पतिं वन आ (Rig Veda X. 101. 11). बृहस्पतिं यः (Rig Veda IV. 50. 7) हर्षया शचीपतिम् (Rig Veda VIII. 15. 13) तनूनपादुच्यते (Rig Veda III) 29. 11); नराशंसं वाजिनम् (Rig Veda I. 106. 4) शुनःशेपम् (Rig Veda V. 2. 7 वनस्पतिः, both वन and पति have acute on the first syllable, and the सुट् augment comes by VI. 1. 157. (2) बृहस्पतिः or बृहस्पतिः = बृहतां पतिः (VI. 1. 157). The word बृहत् is acutely accented on the final, some say it has acute on the first. (3) शचीपतिः (Śachî being formed by ङीष्) some make Śachî acute on the first शचीपतिः, by including it in Sarangrava class (IV. 1. 73). (4) तनूनपात् (tanû being formed by ऊ Un I 80 has acute on the final, according to others it has acute on the first and napât = na pâti or na palayati with क्विप् and has acute on the first). (5) नराशंसः (नरा अस्मिन्नासीनाः शंसन्ति or नरा एव शंसन्ति) (nara is formed by अच् and has acute on the first. Sansa is formed by घञ्, the lengthening takes place by VI. 3. 137). (6) शुनःशेपः = शुन इव शेपोऽस्य is a Bahuvrihi : the Genitive is not elided by (VI. 3. 21. Vârt), and both have acute on the first. (7) शण्डामर्कौ both 'Saṇḍa' and 'Marka' being formed by घञ् have acute on the first : the lengthening takes place by VI 3. 137. (8) तृष्णावरूत्री । Tṛishṇa has acute on the first, वरूत्री has acute on the final. The lengthening here also is by VI. 3. 137. (9) बम्बाविश्ववयसौ । Bamba is finally acute, and viśva by VI. 2. 106 has acute on the final, as viśvavayas is a Bahuvrihi. The lengthening takes place as before by VI. 3. 137. (10) मर्मृत्युः । मर् is formed by विच् affix and मृत्यु has acute on the final. The words governed by this sutra are those which would not be included in the next two sûtras.

**३८७५ । देवताद्वन्द्वे च । ६ । २ । १४१ ॥**

उभे युगपत्प्रकृत्या स्तः । 'आ य इन्द्रावरुणौ' । 'इन्द्राबृहस्पती वयम्' । 'देवता' किम् । प्लक्षन्यग्रोधौ । 'द्वन्द्वे' किम् । अग्निष्टोमः ॥

3875. In a Dvandva compound of names of Divinities, the both members retain their original accent.

Thus आय इन्द्रावरुणा (Rig Veda VI. 68. 1) इन्द्राबृहस्पती वयं (Rig Veda IV. 49. 5). The word इन्द्र has acute on the first (by nipâtana), वरुण is formed by उनन् (Un. III. 53) and by VI. 1. 197 has acute on the first. बृहस्पति has two acutes by VI. 2. 140, and Indra-Brihaspati has three acutes. Why do we say 'names of divinities'? Observe प्लक्षन्यग्रोधौ। Why do we say 'a Dvandva'? Observe अग्निष्टोमः ॥

३८७६ । नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु । ६ । २ । १४२ ॥

पृथिव्यादिवर्जितेऽनुदात्तादावुत्तरपदे प्रागुक्तं न । 'इन्द्राग्निभ्यां कं वृषणः' । 'अपृथिव्यादौ' किम् । 'द्यावापृथिवी जनयन्' । आद्युदात्तो द्यावा निपात्यते । पृथिवीत्यन्तोदात्तः । रुद्रसोमौ । 'रोदेर्णिलुक्च' इति रगन्तो रुद्रशब्दः । 'इन्द्रापूषणौ' । 'श्वन्नुक्षन्पूषन् —' इति पूषा अन्तोदात्तो निपात्यते । शुक्रामन्थिनौ । मन्थिन्निन्नन्तत्वादन्तोदात्तः । उत्तरपदग्रहणमनुदात्तादावित्युत्तरपदविशेषणं यथा स्याद्द्वन्द्वविशेषणं मा भूत् । अनुदात्तादाविति विधिप्रतिषेधयोर्विषयविभागार्थम् ॥

3876. In a Dvandva compound of the names of divinities, both members of the compound simultaneously do not retain their accent, when the first syllable of the second word is anudâtta, with the exception of पृथिवी, रुद्र, पूषन् and मन्थिन् ॥

Thus इन्द्राग्निभ्यां कं वृषणः (Rig Veda I. 109. 3). Agni has acute on the final.

Why do we say with the exception of 'prithivi' &c ? Observe द्यावापृथिवी जनयन् (Rig Veda X. 66. 9.) dvyâvâ has acute on the first, 'prithivî' being formed by 'ṅish', has acute on the final. सोमारुद्रौ, Rudra is formed by 'rak' affix (Uṇ. II. 22.), and has acute on the final. इन्द्रापूषणा (Rig Veda VII. 35. 1) Pûshan has acute on the end. (Uṇ. I. 159) शुक्रामन्थिनौ, the words Śukra and manthin have acute on the final.

The word uttarapada is repeated in the sûtra, in order that it should be qualified by the word 'anudâttadau', which latter would otherwise have qualified Dvandva. The word 'anudâttâdau' shows the scope of the prohibition and the injunction.

३८७७ । अन्तः । ६ । २ । १४३ ॥

अधिकारोऽयम् ॥

3877. In the following sûtras up to the end of the chapter should always be supplied the phrase 'the last syllable of the second member has the acute.'

३८७८ । थाथघञ्क्ताजबित्रकाणाम् । ६ । २ । १४४ ॥

'थ' 'अथ' 'घञ्' 'क्त' 'अच्' 'अप्' 'इत्र' 'क' एतदन्तानां गतिकारकोपपदात्परेषामन्त उदात्तः । 'प्रभृथस्यायोः' । आवसथः । घञ् । प्रभेदः । क्त । 'धर्ता वज्री पुरुष्टुतः' । पुरुषु बहुप्रदेशेषु स्तुत इति विग्रहः । अच् । प्रक्षयः । अप् । प्रलवः । इत्र । प्रलवित्रम् । क । गोवृषः । मूलविभुजादित्वात्कः । गतिकारकोपपदादित्येव । सुस्तुतं भवता ॥

3878. The last syllable of the second member has the acute in the verbal nouns ending in य, अथ, घञ्, क्त, अच्, अप्, इत्र and क, when preceded by a Gati, a Kâraka or an Upapada (VI. 2. 139).

Thus प्रभृथस्यायोः (Rig Veda V. 41. 19), प्रभृथं formed by क्थन् affix (Uṇ. II. 2 and 3), and but for this sûtra, by VI. 2. 139 this word would have retained its original accent, which was acute on the first. अथः – आवसथः formed by अथन् affix (Uṇ. III. 116). घञ्—प्रभेदः, । क्तः—धर्तावज्रो पुरुष्टुतः (Rig Veda I. 11. 4). The word पुरुष्टुतः should be analysed as पुरुषु बहुप्रदेशेषु स्तुतः 'praised in many lands'. अच् (III. 3. 56) :—प्रक्षयः, the word क्षय 'dwelling,' is end acute, otherwise on the first (VI. 1. 201, 202). अप्—प्रलवः । इत्र—प्रलविन्नम् । क-गोवृषः= गां वर्षति, (III. 2. 5 Vârt) : (क—being added by III. 1. 135). The word वृष has acute on the first, as it belongs to वृषादि class (VI. 1 203). When the preceding words are not Gati, Kâraka or Upapada, this rule does not apply : as सुस्तुतं भवता, where सु being Karmapravachanîya, the word gets the accent of the Indeclinable.

३८७९ । सूपमानात्क्तः । ६ । २ । १४५ ॥

सोऽपमानाच्च परं क्तान्तमन्तोदात्तम् । 'ऋतस्य योनौ सुकृतस्य' । शशप्लुतम्: ॥

3879. The participle in *kta* has acute on the final, when it is preceded by *su* or by a word with which the second member is compared.

Thus सुकृतम्, in the following Rik ऋतस्य योनौ सुकृतस्य (Rig Veda X. 85. 24. With Upamâna words we have—शशप्लुतम् । This debars VI. 2. 49 and 48. When सु is not a Gati, the rule does not apply, as सुस्तुतम् भवता ॥

३८८० । संज्ञायामनाचितादीनाम् । ६ । २ । १४६ ॥

गतिकारकोपपदात्क्तान्तमन्तोदात्तमाचितादीन्वर्जयित्वा । उपहूतः शाकल्यः । परिजग्धः कौण्डिन्यः । 'अन-' इति किम् । आचितम् । आस्थापितम् ॥

3880. The Participle in 'kta' has acute on the last syllable when preceded by a Gati, or a Kâraka or an Upapada, if the compound denotes a Name, but not in 'âchita' &c.

Thus उपहूतः शाकल्यः, परिजग्धः कौण्डिन्यः । This debars VI. 2. 49. Why do we say 'when it is not आचित &c.' Observe आचितम् &c.

1 आचित, 2 पर्याचित, 3 आस्थापित, 4 परिगृहीत, 5 निरुक्त, 6 प्रतिपन्न, 7 अपश्लिष्ट, 8 प्रश्लिष्ट, 9 उपहित (उपहत), 10 उपस्थित, 11 संहितागवि (संहिताशब्दो यदा गोरन्यस्य संज्ञा तदान्तोदात्तो न भवति । यदा तु गोः संज्ञा तदान्तोदात्त एव) ॥

The word संहिता in the above list does not take acute on the final, when it is the name of anything else than a 'cow'; but when it denotes 'a cow' it has acute on the final.

३८८१ । प्रवृद्धादीनां च । ६ । २ । १४७ ॥

एषां क्तान्तमुत्तरपदमन्तोदात्तम् । प्रवृद्धः । प्रयुक्तः । असंज्ञार्थोऽयमारम्भः । आकृतिगणोऽयम् ॥

3881. The words 'pravriddha' &c., ending in 'kta' have acute on the final.

Thus प्रवृद्धः, प्रयुक्तः । The rule is applicable to compounds which do not denote a name. It is an Akritigaṇa. The words have acute on the final, even when not followed by यान &c., though in the Gaṇapâṭha they are read along with these words. Some hold it is only in connection with यान &c. that these words have acute on the final. This being an Akritigaṇa we have पुनरुत्स्यूतं वासो देयं, पुनर्निष्कृतो रथः &c.

1 प्रवृद्धं यानम्, 2 प्रवृद्धो वृषलः, 3 प्रयुताः सूष्णावः or प्रयुताः सक्तवः, 4 आकर्षे ऽवहितः 5 अवहितो भोगेषु, 5 खट्वारूढः, 7 कविशस्तः, आकृतिगण ॥

३८८२ । कारकाद्दत्तश्रुतयोरेवाशिषि । ६ । २ । १४८ ॥

संज्ञायामन्त उदात्तः । देवदत्तः । विष्णुश्रुतः । 'कारकात्' किम् । संभूतो रामायणः । 'दत्तश्रुतयोः' किम् । देवपालितः । अस्मान्नियमादत्र 'संज्ञायामनु–' (३८८०) इति न । 'तृतीया कर्मणि' (३७८२) इति तु भवति । 'एव' किम् । कारकावधारणं यथा स्यात् दत्तश्रुतावधारणं मा भूत् । अकारकादपि दत्तश्रुतयोरन्त उदात्तो भवति । संश्रुतः । 'आशिषि' किम् । देवैः खाता देवखाता । आशिष्येवेत्येवमत्रेष्टो नियमः । तेनानाशिषो नदीति देवदत्त इत्यत्र न । शङ्खविशेषस्य संज्ञेयम् । 'तृतीया कर्मणि' (३७८२) इति पूर्वपदप्रकृतिस्वरत्वमेव भवति ॥

3882. The final of Past Participles 'datta' and 'sruta' alone has acute, in a compound denoting a Name and a benediction, the preceding word being a word standing in close relation to an action (kâraka).

Thus देवा एनं देयासुः = देवदत्तः, विष्णुरेनं श्रूयात् = विष्णुश्रुतः । Why do we say 'preceded by a kâraka'? Observe संभूतो रामायणः । The word कारक indicates that the rule will not apply when a gati or upapada precedes.

Why do we say 'of दत्त and श्रुत'? Observe देवपालितः (VI. 2. 48), which, though a Name, is not governed by VI. 2. 146, and does not take acute on the final, for the present rule makes a restriction with regard to that rule even. So that where a Participle in क्त is preceded by a kâraka, and the compound denotes a benediction and a Name, the accent is not on the final, as required by VI. 2. 146; S. 3880 but such a word is governed by VI. 2. 48, S. 3782 unless the Participle be Datta and śruta, when the present rule applies.

Why do we use 'एव (*alone*)'? So that the restriction should apply to 'kâraka', and not to Datta and Śruta. For the words Datta and Śruta will have acute on the final even after a nonkâraka word. As संश्रुतः ॥

Why do we say 'when denoting benediction'? The rule will not apply where benediction is not meant. As देवैः खाता = देवखाता । This rule applies to Datta and Śruta after a kâraka-word, only when benediction is meant. It therefore does not apply to देवदत्त 'the name of Arjuna's conch', as अनाशिषो नदति देवदत्तः, which is governed by VI. 2. 48.

३८८३ । इत्थंभूतेन कृतमिति च । ६ । २ । १४९ ॥

इत्थंभूतेन कृतमित्येतस्मिन्नर्थे यः समासस्तत्र क्तान्तमुत्तरपदमन्तोदात्तं स्यात्। सुप्तप्रलपितम्। प्रमत्तगीतम्। कृतमिति क्रियासामान्ये करोतिर्नभूतप्रादुर्भाव एव। तेन प्रलपिताद्यपि कृतं भवति 'तृतीया कर्मणि' (३७८२) इत्यस्यापवादः ॥

3883. The Participle in *kta* has acute on the final, when the compound denotes 'done by one in such a condition.'

The word इत्थंभूत means 'being in such a condition.' Thus सुप्तप्रलपितम्, प्रमत्तगीतम्, as Adjectives and Abstract verbal nouns. This is an exception to VI. 2. 48. When the words प्रलपित &c. are used to denote Noun of Action (भाव) then by VI. 2. 144 they get of course acute on the final.

३८८४ । अनो भावकर्मवचनः । ६ । २ । १५० ॥

कारकात्परमनप्रत्ययान्तं भाववचनं कर्मवचनं चान्तोदात्तम्। पयःपानं सुखम्। राजभोजनाः शालयः। 'अनः' किम्। हस्तादायः। 'भा-' इति किम्। दन्तधावनम्। करणे ल्युट् 'कारकात्' किम्। निदर्शनम् ॥

3884. After a kâraka as mentioned in VI. 2. 148, the second member ending in the affix अन, and denoting an action in the Abstract or the object (*i. e.* having the senses of a Passive Adjective), has acute on the final.

Thus पयःपानं सुखम्। This is an example of भाव or Abstract Verbal Noun. राजभोजनाः शालयः, is an example of कर्मवचन or Passive Adjective. This is formed by ल्युट् under III. 3. 116. For the Sûtra III. 3. 116 may be explained by saying that (1) ल्युट् is applied when the Upapada is in the objective case and bhâva is meant, (2) as well as when object is to be expressed. When the first explanation is taken, the above are examples of Bhâva; when the second explanation is taken they are examples of Karma. Why do we say 'ending in अन्'? Observe हस्तादायः। Why do we say 'when expressing an action in the abstract (bhâva), or an Object (karma)'? Observe दन्तधावनम्, here ल्युट् is added after an Instrumental kâraka (III. 3. 117). Why do we say 'after a kâraka'? Observe निदर्शनम्। In all the counter-examples, the second members retain there original accent.

३८८५ । मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः । ६ । २ । १५१ ॥

कारकात्परा एतान्युत्तरपदान्यन्तोदात्तानि तत्पुरुषे। कृत्स्वरापवादः। रथवर्त्म। पाणिनिकृतिः छन्दोव्याख्यानम्। राजशयनम्। राजासनम्। अश्वस्थानम्। ब्राह्मणयाजकः। गोक्रीतः। 'कारकात्' किम्। 'प्रभृतौ संगतिम्'। अत्र 'तादौ च निति-' (३८८४) इति स्वरः ॥

3885. The words ending in मन् or क्तिन् affixes, and the word व्याख्यान, शयन, आसन, स्थान and क्रीत as well as याजक &c. have acute on the final, when at the end of a compound, preceded by a kâraka word.

Thus भर्त्—राजभर्ता । सिक्त्—पाणिनिसूत्रकारः । व्याख्यान—छन्दोव्याख्यानम् । शयन—राजशयनम् । आसन्—राजासनम् । स्थान—अश्वस्थानम् । याजकादि words are those which form Genitive compounds under II. 2. 9, and those compounds only are to be taken here; as ब्राह्मणयाजकः, क्षत्रिययाजकः, ब्राह्मणपूजकः, क्षत्रियपूजकः । क्रोत—गोक्रोतः । This is an exception to VI. 2. 139, and in the case of क्रोत, rule VI. 2. 48 is superseded. The words व्याख्यान &c. do not denote here भाव or कर्म, had they done so, rule VI. 2. 149 would have covered them. When the first member is not a kâraka, we have प्रभूतो संगतिम् । Here the accent is governed by VI. 2. 50, S. 3784.

1 याजक, 2 पूजक, 3 परिचारक, 4 परिवेषक परिवेषक, 5 स्नापक स्नातक, 6 अध्यापक, 7 उत्साहक (उत्सादक) 8 उद्वर्तक, 9 होतृ, 10 भर्तृ, 11 रथगणक, 12 पत्तिगणक, 13 पोतृ, 14 होतृ. 15 वर्तक ॥

३८८६ । सप्तम्याः पुण्यम् । ६ । २ । १५२ ॥

अन्तोदात्तम् । अध्ययनपुण्यम् । 'तत्पुरुषे तुल्यार्थ-' (३७३६) इति प्राप्तम् । 'सप्तम्याः' किम् । वेदेन पुण्यं वेदपुण्यम् ॥

3886. The word 'puṇya' has acute on the final when preceded by a noun in the Locative case.

Thus अध्ययने पुण्यम् = अध्ययनपुण्यम् । The compounding takes place by II. 1. 40 by the process of splitting the sûtra (yoga-vibhâga), taking सप्तमी there as a full sûtra, and शौण्डैः another. Here by VI. 2. 2, S. 3736 the first member would have preserved its accent, the present sûtra supersedes that and ordains acute on the final. The word पुण्य is derived by the Uṇâdi affix यत् (Uṇ V. 15) and would have retained its natural accent (VI. 1. 213) and thus get acute on the first syllable by kṛit-accent. (VI. 2. 139). Why do we say 'a locative case'? Observe वेदेन पुण्यं = वेदपुण्यम् ॥

३८८७ । ऊनार्थकलहं तृतीयायाः । ६ । २ । १५३ ॥

माषोनम् । माषविकलम् । वाक्कलहः । तृतीयापूर्वपदप्रकृतिस्वरापवादोऽयम् । अत्र केचिदर्थेति स्वरूपग्रहणमिच्छन्ति । धान्यार्थः । ऊनशब्देन त्वर्थनिर्देशार्थेन तदर्थानां ग्रहणमिति प्रतिपादोक्तत्वादेव सिद्धे तृतीयाग्रहणं स्पष्टार्थम् ॥

3887. The acute falls on the final of words having the sense of 'ûna,' and of 'kalaha' when they are second members in a compound, preceded by a term in the instrumental case.

Thus माषोनम्, माषविकलम्, वाक्कलहः । The compounding takes place by II. 1. 31. This is an exception to VI. 2. 2 by which the first member being in the third case, would have retained its original accent. Some say that the word अर्थ in the sûtra means the word' form अर्थ, so that the aphorism would mean—'after an Instrumental case, the words ऊन, अर्थ, and कलह get acute on the final.' The examples will be in addition to the above:—धान्येनार्थः = धान्यार्थः । If this be so, then the word-form ऊन alone will be taken and not its synonyms like विकल &c. To this we reply, that ऊन will denote its synonyms also, by the fact of its being followed by the word अर्थ । By sûtra II. 1. 13, ऊनार्थ and कलह always take the

Instrumental case, so we could have omitted the word तृतीयान्ताः, from this sûtra for by the maxim of pratipadokta &c. कृत्यैकवचनं would have referred to the compound ordained by II. 1. 31. The mention of तृतीया here is only for the sake of clearness

३८८८ । मिश्रं चानुपसर्गमसंधौ । ६ । २ । १५४ ॥

पणबन्धेनैकार्थ्यं संधिः । तिलमिश्राः । सर्पिर्मिश्राः । 'मिश्रम्' किम् । गुडधानाः । 'अनुपसर्गम्' किम् । तिलसंमिश्राः । 'मिश्रग्रहणे सोपसर्गग्रहणस्य' इदमेव ज्ञापकम् । 'असंधौ' किम् । ब्राह्मणमिश्रो राजा । ब्राह्मणैः सह संहित ऐकार्थ्यमापन्नः ॥

3888. The word 'miśra' has acute on the final after an Instrumental case, when it is not joined with any Preposition and does not mean a 'compact or alliance.'

Thus तिलमिश्राः सर्पिर्मिश्राः । Why do we say मिश्र ? Observe गुडधानाः । Why do we say 'not having a Preposition' ? Observe तिलसंमिश्राः । The employment in this sûtra of the phrase 'anupasargam' implies, that wherever else, the word miśra is used, it includes miśra with a preposition also. Therefore in II. 1. 31 where the word मिश्र is used, we can form the Instrumental compounds with मिश्र preceded by a preposition also.

Why do we say 'not denoting a compact' ? Observe ब्राह्मणमिश्रो राजा = ब्राह्मणैः सह संहित ऐकार्थ्यमापन्नः ॥

३८८९ । नञो गुणप्रतिषेधे संपाद्यर्हहितालमर्थास्तद्धिताः । ६ । २ । १५५ ॥

संपाद्यर्हहितालमर्थतद्धितान्ता नञो गुणप्रतिषेधे वर्तमानात्परेऽन्तोदात्ताः । कर्णवेष्टकाभ्यां संपादि कार्णवेष्टकिकम् । न कार्णवेष्टकिकमकार्णवेष्टकिकम् । छेदमर्हति छैदिकः । न छैदिकोऽच्छैदिकः । न वत्सेभ्यो हितोऽवत्सीयः । न संतापाय प्रभवति असांतापिकः । 'नञः' किम् । गर्दभरथमर्हति गार्दभरथिकः । विगार्दभरथिकः । 'गुणप्रतिषेधे' किम् । गार्दभरथिकादन्योऽगार्दभरथिकः । गुणो हि तद्धितार्थे प्रवृत्तिनिमित्तं संपादित्वाद्युच्यते । तत्प्रतिषेधो यत्रोच्यते तत्रायं विधिः । कर्णवेष्टकाभ्यं न संपादि मुखमिति । 'संपादि-' इति किम् । पाणिनीयमधीते पाणिनीयः । न पाणिनीय अपाणिनीयः । 'तद्धिताः' किम् । वोढुमर्हति वोढा । न वोढावोढा ॥

3889. The words formed with the Taddhita affixes denoting , fitted for that' (V. 1. 99), 'deserving that' (V. 1. 63), 'good for that' (V. 1. 5), 'capable to effect that' (V. 1. 101), have acute on the final, when preceded by the Negative Particle 'nañ' when it makes a negation with regard to the abovementioned attributes.

Thus संपादि 'suited for that' (V. 1. 99) :—अकार्णवेष्टकिकं मुखम् = न कार्णवेष्टकिकं (कर्णवेष्टकाभ्यां सम्पादि) । The affix is ठञ् । अर्ह 'deserving that' (V. 1. 63) :—अच्छैदिकः = न छैदिकः (छेदमर्हति). The affix is ठक् (V. 1. 64 and V. 1. 19). हित 'good for that' (V. 1. 5) :—अवात्सीयः = न वत्सेभ्यो हितः । The affix is छ V. 1. 1. अलमर्थः 'capable to effect that' (V. 1. 101) :—असांतापिकः = न सांतापिकः । The affix is ठञ् (V. 1. 18). Why do we say 'after नञ्' ? Observe गर्दभरथमर्हति = गार्दभरथिकः, विगार्दभरथिकः, where the negative वि is used and therefore the avyaya वि retains its accent by VI. 2. 2. Why do we say 'negation of

that attribute'? Observe गार्ग्यभरचिकादन्यः = अगार्ग्यभरचिकः । The word गुण here means the attribute denoted by the Taddhita affix, and not any attribute in general. Thus अकार्ष्णवैष्ठकिकं मुखं = कार्ष्णवैष्ठकाभ्याम् मुखम् । Why do we say 'in the sense of samapâdi &c'? Observe पाणिनीयमधीयते = पाणिनीयः = अपाणिनीयः । Why do we say 'Taddhita affixes'? Observe कन्यां वोढुमर्हति = कन्यावोढा, न वोढा अवोढा । Here तृच् a krit is added in the sense of 'deserving' (III. 3. 169).

३८९० । ययतोश्चातदर्थे । ६ । २ । १५६ ॥

ययतौ यौ तद्धितौ तदन्तस्योत्तरपदस्य नञो गुणप्रतिषेधविषयात्परस्यान्त उदात्तः स्यात् । पाशानां समूहः पाश्या अपाश्या । न पाश्या अदंत्यम् । 'अतदर्थे' किम् । अपाद्यम् । 'तद्धितः' किम् । अदेयम् । 'गुणप्रतिषेधे' किम् । दंत्यादन्यददंत्यम् ॥

'+ तदनुबन्धकग्रहणे नातदनुबन्धकस्य+' इति । नेह । अवामदेव्यम् ॥

3890. The words formed with the Taddhita affixes य and यत् when not denoting 'useful for that,' have acute on the last syllable, after the particle नञ् negativing the attribute.

Thus पाशानां समूहः = पाश्याः, न पाश्याः = अपाश्याः, (IV. 2. 49) दन्तेषु भवं = दन्त्यम् न दन्त्यं = अदन्त्यम्, (V. 1. 6). Why do we say 'atadartha:—not useful for that, Observe पादार्थमुदकम् = पाद्यम्, न पाद्यम् = अपाद्यम् (V. 4. 25). Why do we say 'Taddhita'? This rule does not apply when the affixes are not Taddhita, as अदेयम् formed with the krit-affix यत् । Why do we say 'negativing the attribute'? There must be negation of the attribute, otherwise दन्त्यादन्यत् = अदंत्यम् । *Paribhâshâ:*— "When a term with one or more Anubandhas is employed in Grammar, it does not denote that which in addition to those one or more anubandhas has another Anubandha attached to it." The affix य and यत्, one without any anubandha and the other with the anubandha त् being specifically mentioned, excludes all other affixes having य as their effective element, such as ड्य &c. (IV. 2. 9), thus न वामदेव्यं = अवामदेव्यम् । See IV. 2. 9.

३८९१ । अच्कावशक्तौ । ६ । २ । १५७ ॥

अजन्तं कान्तं च नञः परमन्तोदात्तमशक्तौ गम्यायाम् । अपचः पक्तुमशक्तः । अविलिख: । 'अशक्तौ' किम् । अपचो दीक्षितः । गुणप्रतिषेध इत्येव । अन्योऽयं पचादपचः ॥

3891. A word formed with the krit affix अच् and क, preceded by the particle नञ्, has acute on the final, when the meaning is 'not capable'.

Thus अपचः = य पक्तुं न शक्नोति, so also अविलिखः (III. 1. 134 &c). Why do we say when meaning 'not capable'? Observe अपचो दीक्षितः । A दीक्षित does not cook his food, not because he is physically incapable of cooking, but because by the vows of his particular order he is prohibited from cooking.

३८९२ । आक्रोशे च । ६ । २ । १५८ ॥

नञः परावच्कावन्तोदात्तावाक्रोशे । अपचो जाल्मः । पक्तुं न शक्नोतीत्येवमाक्रोशते । अविक्षिपः ॥

3892. A word formed by the krit-affixes अच् or क, preceded by the Negative particle, has acute on the final when one abuses somebody by that word.

Thus अपचो॑ऽयं जाल्मः 'this rogue does not cook, though he can do so.' Here avarice is indicated, the fellow wants more pay before he will cook : and not his incapacity. So also अविक्षि॑पः ॥

३८९३ । संज्ञायाम् । ६ । २ । १५९ ॥

नञः परमन्तोदात्तं संज्ञायामाक्रोशे । अदेवदत्तः ॥

3893. When abuse is meant, a word preceded by 'nañ' has acute on the final, in denoting a Name.

Thus अदेवदत्तः 'No Devadatta, not deserving of this name.'

३८९४ । कृत्योकेष्णुच्चार्वादयश्च । ६ । २ । १६० ॥

नञः परेऽन्तोदात्ताः स्युः । अकर्तव्यः । उक् । अनागामुकः । इष्णुच् । अनलंकरिष्णुः । इष्णुजग्रहणे खिष्णुचो द्व्यनुबन्धकस्यापि ग्रहणमिकारादेर्विधानसामर्थ्यात् । अनाढ्यंभविष्णुः । चार्वादिः । अचारुः । 'राजाह्नोश्छन्दसि' । अराजा । अनहः । 'भाषायाम्' नञः स्वर एव ॥

3894. After the Negative particle, words formed by the kritya affixes (III. 1. 95), by उक, and इष्णुच्, and the words चारु &c. have acute on the final.

Thus kritya:—अकर्तव्य॑ः । उकः—अनागामुक॑ः । इष्णुच्—अनलंकरिष्णु॑ः । The affix इष्णुच् includes खिष्णुच् also : though the latter contains two anubandhas. In sûtra III. 2. 57 खिष्णुच् is ordained after भू but instead of खिष्णुच् with इ, the affix might have been well exhibited as ख्ष्णुच् without इ. As भू is udâtta, भू + ख्ष्णुच् = भू + इट् + ख्ष्णुच् । So that we would have got the required form. But as a matter of fact the affix is exhibited there with an इ for the sake of the present sûtra only, so that इष्णुच् here may include खिष्णुच् also । अनाढ्यंभविष्णु॑ः, चारु &c:—अचारु॑ः, असाधु॑ः, अयौधिक॑ः, अवदान्यः, अनजमेजय॑ः (double negation). अनकस्मात् (double negation). The words वर्तमान, वर्धमान त्वरमाण, ध्रियमाण, रोचमान क्रीयमाण, and शोभमान preceded by अ (नञ्) when denoting names have acute on the final. अविकार॑ः, असदृश॑ः and अविकारसदृश॑ः (विकार and सदृश taken jointly and separately). अगृहपति, अगृहपतिक॑ः । अराजा॑ and अनह॑ः in the Vedas only. In the Vernacular they have the accent of नञ्, i. e. udâtta on the first.

1. चारु, 2 साधु, 3 यौधिक (यौधिक) 4 अनङ्गमेजय, 5 वदान्य, 6 अकस्मात्, 7 वर्तमानवर्धमानत्वरमाणध्रियमाणक्रीयमाणरोचमानशोभमानाः (क्रियमाण क्रीयमाण) संज्ञायाम्, 8 विकारसदृशे व्यस्ते समस्ते (अविकार, असदृश अविकारसदृश), 9 गृहपति, 10 गृहपतिक, 11 राजाह्नोश्छन्दसि ॥

३८९५ । विभाषा तृन्नन्नतीक्ष्णशुचिषु । ६ । २ । १६१ ॥

तृन् । अकर्ता । अन्न । अनन्नम् । अतीक्ष्णम् । अशुचि । पक्षेऽव्ययस्वरः ॥

3895. After the Negative particle, the final of the following is optionally acute :—a word formed with the affix 'trin,' and the words चण, तीक्ष्ण, and शुचि ॥

Thus तृन्–अकर्त्ता or अकर्त्ता ; चण &c–अचणम् or अचणम्, अतीक्ष्णम्, or अतीक्ष्णम्, अशुचिः or अशुचिः ॥ The alternative accent is that of the Indeclinable (VI. 2. 2).

३८९६ । बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने । ६ । २ । १६२ ॥

एभ्योऽनयोरन्त उदात्तः । इदं प्रथममस्य स इदंप्रथमः । एतद्द्वितीयः । तत्पञ्चमः । 'बहुव्रीहौ' किम् । अनेन प्रथम इदंप्रथमः । 'तृतीया–' (६९२) इति योगविभागात्समासः । 'इदमेतत्तद्भ्यः' किम् । यत्प्रथमः । 'प्रथमपूरणयोः' किम् । तानि बहून्यस्य तद्बहुः । 'क्रियागणने' किम् । अयं प्रथमः प्रधानं एषां त इदंप्रथमाः । द्रव्यगणनमिदम् । 'गणने' किम् । अयं प्रथम एषां त इदंप्रथमाः । इदंप्रधाना इत्यर्थः । उत्तरपदस्य कार्यित्वात्कपि पूर्वमन्तोदात्तम् । इदंप्रथमकाः । बहुव्रीहावित्यधिकारो 'वन' समासे' (३९१२) इत्यतः प्राग्बोध्यः ॥

3896. In a Bahuvrîhi, after the words इदम्, एतद् and तद् the last syllable of प्रथम and of a proper Ordinal Numeral, has the acute, when the number of times of an action is meant.

Thus इदं प्रथमं गमनं भोजनं वा=स इदम्प्रथमः 'this is the first time of going or eating.' एतद्द्वितीयः, तत्पञ्चमः । Why do we say 'in a Bahuvrîhi ?' Observe अनेन=प्रथमः इदंप्रथमः । Here the compounding takes place under S. 692 by dividing that sûtra into two parts by the method of yoga-bibhâga. Here the first member, being in the third case, retains its accent by VI. 2. 2.

Why do we say 'after idam &c.' Observe यत्प्रथमः=यःप्रथम एषाम्, here the first term retains its accent by VI. 2. 1.

Why do we say 'of prathama and the Ordinals'? Observe तानिबहून्यस्य=तद्बहुः ॥

Why do we say 'in counting an action'? Observe अयं प्रथम एषां=त इदं प्रथमाः । Here *substances* are counted and not *action*.

Why do we say 'in counting'? Observe अयं प्रथम एषां=इदं प्रथमाः *i. e.* इदं प्रधानाः and the word प्रथम means here 'foremost,' and is not a numeral.

When the कप् affix is added, the acute falls on the last syllable preceding कप् । As इदं प्रथमकाः । The Bahuvrîhi governs the subsequent sûtras up to VI. 2. 178, S, 3912.

३८९७ । संख्यायाः स्तनः । ६ । २ । १६३ ॥

बहुव्रीहावन्तोदात्तः । द्विस्तना । चतुस्तना । 'संख्यायाः' किम् । दर्शनीयस्तना । 'स्तनः' किम् । द्विशिराः ॥

3897. In a Bahuvrîhi, after a Numeral, the word 'stana' has acute on the final.

Thus द्विस्तनौ, चतुःस्तनाः । Why do we say 'after a Numeral'? Observe दर्शनीयस्तना । Why do we say 'स्तन'? Observe द्विशिराः ॥

३८९८ । विभाषा छन्दसि । ६ । २ । १६४ ॥

'द्विस्तनाः करोति' ॥

3898. Optionally so, in the Vedas, the stana after a Numeral has acute on the final.

Thus द्विस्तनाॅ or द्विॅस्तना, चतुःस्तनाॅ or चॅतुःस्तना ॥

३८९९ । संज्ञायां मित्राजिनयोः । ६ । २ । १६५ ॥

देवमित्रः । कृष्णाजिनम् । 'संज्ञायाम्' किम् । प्रियमित्रः ॥

'+ ऋषिप्रतिषेधोऽत्र मित्रे +' विश्वामित्रर्षिः ॥

3899. In a Bahuvrîhi, ending in 'mitra' and 'ajina' the acute falls on the last syllable, when the compound denotes a Name.

As देवमित्रॅः, कृष्णाजिनॅम् । Why do we say 'a Name'? Observe प्रियमित्रॅः ॥

*Vârt:*—Prohibition must be stated in the case of मित्र when the name is that of a Rishi. As विश्वाॅमित्रः which is governed by VI. 2. 106 ॥

३९०० । व्यवायिनोऽन्तरम् । ६ । २ । १६६ ॥

व्यवधानवाचकात्परमन्तरमन्तोदात्तम् । वस्त्रमन्तरं व्यवधायकं यस्य स वस्त्रान्तरः । 'व्यवधायिनः' किम् । आत्मान्तरः । अन्यस्वभाव इत्यर्थः ॥

3900. In a Bahuvrîhi ending in 'antara' the acute falls on the final, after a word which denotes 'that which lies between.'

Thus वस्त्रान्तरॅम् 'through an intervened cloth or drapery,' वस्त्रमन्तरं व्यवधायकं यस्य &c. Why do we say 'when meaning lying between'? Observe आत्मान्तरम् = आत्मा स्वभावोऽन्तरोऽन्योयस्य ॥

३९०१ । मुखं स्वाङ्गम् । ६ । २ । १६७ ॥

गौरमुखः 'स्वाङ्गम्' किम् । दीर्घमुखा शाला ॥

3901. In a Bahuvrîhi the acute is on the final, when the second member is 'mukha' meaning mouth i. e. the actual bodily part of an animal and not used metaphorically.

Thus गौरमुखॅः । Why do we say 'an actual part of a body'? Observe दीर्घमुखा शाला । Here मुख means 'entrance'.

३९०२ । नाव्ययदिक्छब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः । ६ । २ । १६८ ॥

उच्चैर्मुखः । प्राङ्मुखः । गोमुखः । महामुखः । स्थूलमुखः । मुष्टिमुखः । पृथुमुखः । वत्समुखः । पूर्वपदप्रकृतिस्वरोऽत्र । गोमुष्टिवत्सपूर्वपदस्योपमानलक्षणोऽपि विकल्पोऽनेन बाध्यते ॥

3902. In a Bahuvrîhi, the acute does not fall on such 'mukha' denoting a real mouth, when it comes after an Indeclinable, and a name of a direction, or after गो, महत्, स्थूल, मुष्टि, पृथु and वत्स ॥

Thus अव्यय: उच्चैर्मुॅखः । The word उच्चैः is finally acute and retains its accent. दिक्—प्राॅङ्मुखः । The word प्राङ् has acute on the first by VI. 2, 52, गो &c :—

गोमुखः, महीमुखः' स्थूलमुखः, मुष्टिमुखः, पर्शुमुखः, and वत्समुखः । In these the first members of the Bahuvrîhi preserve their respective accents, under Rule VI. 2. 1 and in the case of compounds preceded by गो, मुष्टि, and वत्स, the optional rule taught in the next sûtra is also superseded by anticipation, though the words may denote comparison.

३९०३ । निष्ठोपमानादन्यतरस्याम् । ६ । २ । १६९ ॥

निष्ठान्तादुपमानवाचिनश्च परं मुखं स्वाङ्गं वान्तोदात्तं बहुव्रीहौ । प्रक्षालितमुखः । पक्षे 'निष्ठोपसर्ग-' (३८४४) इति पूर्वपदान्तोदात्तत्वम् । पूर्वपदप्रकृतिस्वरत्वेन गतिस्वरोऽपि भवति । उपमानम् । सिंहमुखः ॥

3903. In a Bahuvrîhi, the word 'mukha' denoting 'an actual mouth,' has optionally the acute on the final, when preceded by a participle in 'ta' or by that wherewith something is compared.

चवेत्याभ्यां योगे प्रथमा तिङ्विभक्तिर्नानुदात्ता। गाश्च चारयति वीणां वा वादयति। 'हन्तो वा शान्तिमीमहे'। उत्तरवाक्ययोरनुषज्यमानतिङन्तापेक्षयेयं प्राथमिकी। 'योगे' किम्। पूर्वं भूतयोरपि योगे निघातार्थं प्रथमाग्रहणं द्वितीयादेस्तिङन्तस्य मा भूत्॥

3966. The first finite verb only retains its accent in connection with 'cha' and 'vâ.'

The anuvritti of अगतेः which was drawn in the last sûtra, does not run into this. Thus गाश्च चारयति, वीणां च वादयति। हन्तो वा शान्तिमीमहे॥

The word योग in the sutra indicates that the mere *connection* with the verb is meant, whether this connection takes place by adding these words ह and अह, *before* the verb, or *after* the verb, is immaterial for the purposes of this sutra, (not so in the last). The word प्रथम shows that the *first* verb is governed by this rule and not the *second*.

३९६७ । हेति क्षियायाम् । ८ । १ । ६० ॥

हयुक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता धर्मव्यतिक्रमे । स्वयं ह रथेन याति ३ । उपाध्यायं पदातिं गमयति । 'क्षियाशीः-' (३६२३) इति प्लुतः ॥

3967. In connection with 'ha,' the first verb retains its accent, when an offence against custom is reprimanded.

The word क्षिया means an error or mistake of duty, a breach of etiquette or a fault against good breeding.

Thus स्वयं ह रथेन याँति ३, उपाध्यायं पदातिं, गमयति 'He himself goes on a car, while he causes his Preceptor to trudge behind on foot.' Here the nighâta of the first verb is prohibited. The verb becomes svarita-pluta by VIII. 2. 104 S. 3623.

३९६८ । अहेति विनियोगे च । ८ । १ । ६१ ॥

अहयुक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता नानाप्रयोजने नियोगे क्षियायां च । त्वमह ग्रामं गच्छ । त्वमह रथेनारण्यं गच्छ । क्षियायां स्वयमह रथेन याति ३ । उपाध्यायं पदातिं नयति ॥

3968. In connection with अह, the first verb retains its accent, when it refers to various commissions, (as well as when a breach of good manners is condemned).

The word विनियोग means sending a person to perform several commissions. The word च in the sûtra draws in the anuvṛitti of क्षिया also.

Thus त्वं, अह ग्रामं, गच्छ, त्वं अह रथेन अरण्यं गच्छ । So also when क्षिया is meant, स्वयमह रथेन याति ३, उपाध्यायं पदातिं नयति ॥

३९६९ । चाहलोप एवेत्यवधारणम् । ८ । १ । ६२ ॥

'च' 'अह' एतयोर्लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता । देव एव ग्रामं गच्छतु । देव एवारण्यं गच्छतु । ग्राममरण्यं च गच्छत्वित्यर्थः । देव एव ग्रामं गच्छतु । राम एवारण्यं गच्छतु । ग्रामं केवलमरण्यं केवलं गच्छत्वित्यर्थः । इहाहलोपः स च केवलार्थः । 'अवधारणम्' किम् । देव क्वेव भोक्ष्यसे । नक्वचिदित्यर्थः । अनवक्लृप्तावेव ॥

3969. When *cha* and *aha* are elided, the first verb still retains its accent, when *eva* with the force of limitation, takes their place.

When does this लोप take place? Where the sense of च or अह is connoted by the sentence, but these words are not directly employed, there is then the elision of च and अह । There the force of च is that of aggregation (समुच्चय), and of अह is that of 'only' (केवल) The च is elided when the agent is the same; and अह is elided when the agents are several.

Thus where च is elided:—देव स्व ग्राम' गच्छतु, देव अरण्यं गच्छतु ग्रामं चारण्यं च गच्छतु ॥

So where अह is elided : as—देव एव ग्राम' गच्छतु, राम एव अरण्यं गच्छतु = ग्राम' केवलं, अरण्यं केवलं गच्छतु इति अर्थः ॥

Why do we say अवधारणे ' when limitation is meant '? See देव क्वेव भोक्ष्य' यसे । The word एव here has the sense of ' never ' ' an impossibility.' The first sentence means न क्वचिद् भोक्ष्यसे । क्व+एव=क्वेव by पररूप (VI. 1. 94. Vârt).

३९७० । चादिलोपे विभाषा । ८ । १ । ६३ ॥

चवाहाहैवानां लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता । चलोपे । 'इन्द्र वाजेषु नोऽव' । शुक्ला व्रीहयो भवन्ति । श्वेता गा आज्याय दुहन्ति । वालोपे । व्रीहिभिर्यजेत । यवैर्यजेत ॥

3970. When च, (वा, ह, अह and एव) are elided, the first verb optionally retains its accent.

Thus with च लोप:—इन्द्र वाजेषु नोऽव । शुक्ला व्रीहयो भवन्ति or भवन्ति, श्वेता गा आज्याय दुहन्ति । Here भवन्ति optionally may either lose or retain its accent. So also when वा is elided, as :—व्रीहिभि यजेत or यजेत, यवै यजेत । So also with the remaining.

३९७१ । वैवावेति च छन्दसि । ८ । १ । ६४ ॥

'अहर्वै देवानामासीत्' । 'अयं वाव हस्त आसीत्' ॥

3971. Also in connection with ' vai ' and ' vâva ' may optionally, in the Chhandas, the first verb retain its accent.

Thus अहर्वै देवानाम् आसीत् (or आसीत्), अयं वाव हस्त आसीत् (or आसीत्) ॥

वै has the force of स्फुट and समा, and वाव that of प्रसिद्ध and स्फुट ॥

३९७२ । एकान्याभ्यां समर्थाभ्याम् । ८ । १ । ६५ ॥

आभ्यां युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता छन्दसि । 'प्रजामेका जिन्वति' । 'प्रजामेका रक्षति' । 'तयोरन्यः पिप्पलं स्वाद्वत्ति' । 'समर्थाभ्याम्' किम् । एको देवानुपातिष्ठत् । एक इति संख्या पदं नान्यार्थम् ॥

3972. Also in connection with *eka* and *anya*, optionally in the Chhandas, the first verb retains its accent, when these words have the same meaning (' the one—the other ').

Thus प्रजामेका जिन्वति (or जिन्वति), ऊर्जमेका रक्षति । तयोरन्यः पिप्पलं स्वाद्वत्ति (or अत्ति), अनश्नन्नन्यो अभिचाकशीति (Rig Veda I. 164. 20, Mundaka Upanishad III. 1).

Why do we say समर्थाभ्यां ' having the same meaning '? See एको देवानुपातिष्ठत् Here एक is a Numeral and has not the sense of अन्य ' the one another.' The word समर्थ is used, in fact, to restrict the meaning of एक, for it has various meanings : while there is no ambiguity about the word अन्य । एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा । साधारणे समानेऽल्पे संख्यायां च प्रयुज्यते ॥

३९७३ । यद्वृत्तान्नित्यम् । ८ । १ । ६६ ॥

यत्र पदे यच्छब्दस्ततः परं तिङन्तं नानुदात्तम् । यो भुङ्क्ते । यदुद्वाङ्वायुर्वाति । 'नित्य व्यवहितेऽपि कार्यमिष्यते' ॥

3973. In connection with *yad* in all its forms, the verb retains its accent always.

The anuvritti of प्रथमा and छन्दसि ceases. The prohibition of nighâta, which commenced with न लुट् (VIII. 1. 29) is present here also. In what ever sentence the word यद् occurs, that is called यद्वृत्तं । The word वृत्तं denotes here the form of यद् in all its declensions with case affixes. See also the explanation of किंवृत्तं in VIII. 1. 48.

Thus यो भुङ्क्ते, यत् कामास्ते जुहुमः (Rig Veda X. 121. 10) यदुद्वाङ् वायुर्वाति (T. S. V. 5. 1. 1.) यद् वायुः पवते । For the form यदुद्वाङ् see VI. 3. 92.

*Ishti*:—Though the sûtra is in the Ablative (यद्वृत्तात्) and therefore requires that the verb should *immediately* follow it, yet in यदुद्वाङ् वायु र्वाति, the intervention of वायुः does not prevent the operation of this rule, according to the opinion of Pâtanjali.

३९७४ । पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः । ८ । १ । ६७ ॥

पूजनेभ्यः काष्ठादिभ्यः पूजितवचनमनुदात्तम् । काष्ठाध्यापकः ॥

'+ मलोपश्च वक्तव्यः +' । दारुणाध्यापकः । समासान्तोदात्तत्वापवादः । 'एतत्समासे इष्यते नेह । दारुणमध्यापक इति वृत्तिमतम् । पूजनादित्येव पूजितयद्वौ सिद्धे पूजितग्रहणमनन्तरपूजितलाभार्थम् । एतदेव ज्ञापकमत्र प्रकरणे पञ्चमीनिर्देशेऽपि नानन्तर्यमाश्रीयत इति ॥

3974. After a word denoting praise belonging to 'kâsthâdi' class, the word whose praise is denoted, becomes anudâtta.

This refers to compounds, the first members of which are praise-denoting words. The word काष्ठादिभ्यः, is added to the sûtra from a Vârtika.

Thus काष्ठाध्यापकः, काष्ठाभिरूपकः, दारुणाध्यापकः, दारुणाभिरूपकः ॥

अमातापुत्र । अमातापुत्राध्यापकः । अमातापुत्राभिरूपकः । अयुताध्यापकः । अयुताभिरूपकः । अद्भुत । अद्भुताध्यापकः । अनुक्त । अनुक्ताध्यापकः । भृश । भृशाध्यापकः । घोर । घोराध्यापकः । सुख । सुखाध्यापकः । परम । परमाध्यापकः । सु । स्वध्यापकः । अति । अत्यध्यापकः । दृढः । दृढाध्यापकः । दृढाभिरूपकः । स्वध्यापकः । अपुत्र । अपुत्राध्यापकः । कल्याण । कल्याणाध्यापकः ॥

*Vârt*:—The final म् should be elided in forming these words. The word दारुणं is an adverb, and therefore in the accusative case, like ग्रामं गतः । In such a case, there can be no compounding: hence the elision of म् is taught. This becoming of अनुदात्त takes place in the compound, and after composition. In fact it is an exception to the general rule by which a compound is *finally* acute (VI. 1. 223). But there is no elision in दारुणमध्यापकः &c. and there is no loss of accent also of the second word. By the Vârtika 'मलोपश्च', this further fact is also denoted, where the case-affix is not employed and so the म् is not heard, there the second member becomes anudâtta. When there no compounding, there is no elision of म् as दारुणमधीते, दारुणमध्यापकः ॥

Though the word पूजन would have implied its correlative term. पूजित, the specific mention of पूजित in the aphorism indicates that the word denoting पूजित should follow *immediately* after the word denoting पूजन। In fact, this peculiar construction of the sûtra, is a jñâpaka of the existence of the following rule:—इह प्रकरणे पञ्चमी निर्देशेऽपि नानन्तर्यमाश्रीयते "In this subdivision or context, though a word may be exhibited in the Ablative case, it does not follow that there should be consecutiveness between the Ablative and the word indicated by it." This has been illustrated in the previous rule of यद्वृत्तान् नित्यम्, in explaining forms like यद्वयङ् वायुर्वाति &c.

Though the anuvṛitti of anudâtta was current, the express employment of this term in the sûtra indicates that the *prohibition* (of anudâtta) which also was current, now ceases.

The words काष्ठ, &c. are all synonyms of अद्भुत, meaning *wonderful, prodigious:* and are words denoting *praise.*

1 काष्ठ, 2 दारुणं, 3 अमातापुत्र, 4 वेश, 5 अनाज्ञात, 6 अनुज्ञात, 7 अपुत्र, 8 अयुत, 9 अद्भुत, 10 अनुक्त, 11 भृश, 12 घोर, 13 मुख्य, 14 परम, 15 सु, 16 अति, 17 कल्याण

३९७५। सगतिरपि तिङ्। ८। १। ६८॥

पूजनेभ्यः काष्ठादिभ्यस्तिङन्तं पूजितमनुदात्तम्। यत्काष्ठं प्रपचति। 'तिङ्ङतिङः' (३९३५) इति निघातस्य 'निपातैर्यत्-' (३९३७) इति निषेधे प्राप्ते विधिरयम्। सगतिग्रहणाद् गतिरपि निहन्यते। 'गतिग्रहणे उपसर्गग्रहणमिष्यते'। नेह। यत्काष्ठं शुक्लीकरोति॥

3975. (After such words denoting praise) the finite verb (which is praised) becomes anudâtta, even along with the gati, if any, that may precede it.

Whether a finite verb is compounded with a gati or stands single, both the compound and the simple verb lose their accent, when it is qualified by the adverbs काष्ठं &c. Thus यत् काष्ठं पचति, यत् काष्ठं प्रपचति॥ By VIII. 1. 28, S. 3935 the finite verb would have lost its accent after the word काष्ठं, but this loss was prohibited by VIII. 1. 30 S. 3937 in connection with यत्; the present sutra re-ordains the loss, by setting aside the prohibition of VIII. 1. 30. S. 3937.

The word सगति 'along with its Gati', indicates that the Gati even loses its accent. *Ishti* :—The word Gati here is restricted to Upasargas. Therefore not here यत् काष्ठं शुक्लीकरोति॥

३९७६। कुत्सने च सुप्यगोत्रादौ। ८। १। ६९॥

कुत्सने च सुबन्ते परे सगतिरगतिरपि तिङनुदात्तः। पचति पूति। प्रपचति पूति। पचति मिथ्या। 'कुत्सने' किम्। प्रपचति शोभनम्। 'सुपि' किम्। पचति क्लिश्नाति। 'अगोत्रादौ' किम्। पचति गोत्रम्॥

'+ क्रियाकुत्सन इति वाच्यम् +'। कर्तुः कुत्सने मा भूत्। पचति पूतिर्देवदत्तः॥

'+ पूतिश्चानुबन्ध इति वाच्यम् +' तेनायं चकारानुबन्धत्वादन्तोदात्तः॥

'+ वा बहुवचनमनुदात्तमिति वाच्यम् +' पचन्ति पूति॥

3976. A finite verb, along with its preceding Gati, if any, becomes anudâtta, when a Noun, denoting the fault of the action follows, with the exception of 'gotra' &c.

The anuvritti of यद्वात् (VIII. 1. 17) ceases. But the anuvritti of the last sûtra is current. Thus प॒च॑ति॒ पूति, प्र॒प॒च॑ति॒ पूति, प॒च॑ति॒ मिथ्या, प्र॒प॒च॑ति॒ मिथ्या ॥

Why do we say कुत्सने 'denoting the fault of the action'? See प॑चति शोभनम् ॥

Why do we say सुपि 'a noun'? Observe प॑चति क्लिश्नाति ॥

Why do we say with the exception of गोत्र &c. See प॑चति गोत्रम्, प॑चति ब्रुवम्, पचति प्रवचनम् ॥

*Vârt* :—It should be mentioned that the 'fault' mentioned in the sûtra, must be the fault relating to the mode of doing the action, denoted by the verb. The rule will not apply, if the कुत्सन refers to the agent and not to the action. Thus प॑चति पूतिर्देवदत्तः ॥

*Vârt* :—It should be stated that पूति has an indicatory च । The effect of this is that the word पूति is finally acute, because of the indicatory च ॥

*Vârt* :—A finite verb in the plural number, loses its accent optionally: when it loses its accent, then पूति is end-acute. Thus प॒च॒न्ति॒ पूति॑:, or पचन्ति पू॑तिः, प्र॒प॒च॒न्ति पूति॑: or प्रपचन्ति पू॑तिः ॥

## ३९७७ । गतिर्गतौ । ८ । १ । ७० ॥

अनुदात्तः । अभ्युद्धरति । 'गतिः' किम् । दत्तः पचति । 'गतौ' किम् । 'आम॒न्द्रैरि॑न्द्र हरि॑भिर्याहि म॒यूर॑रोमभिः' ॥

3977. A Gati becomes unaccented, when followed by another Gati.

Thus अभ्यु॑द्धरति । Why do we say गतिः 'a Gati becomes &c'? Observe दे॑वदत्तः पचति । Here देवदत्त is a Prâtipadika and does not lose its accent. Why do we say 'when followed by a Gati'? Observe आ॑ मन्द्रैरिन्द्र हरिभिर्याहि मयूर रोमभिः (Rig Veda III. 45. 1.) Here आ is a Gati to the verb याहि, the complete verb is आयाहि । But as आ is not followed by a Gati, but by a Prâtipadika मन्द्र, it retains its accent. Had the word गतौ not been used in the sûtra, this आ would have lost its accent, because the rule would have been too wide, without any restriction of what followed it.

## ३९७८ । तिङि चोदात्तवति । ८ । १ । ७१ ॥

गतिरनुदात्तः । यत्प्रपचति । तिङ्ग्रहणमुदात्तवतः परिमाणार्थम् । अन्यथा हि यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गतिस्तत्र धातावेवोदात्तवति स्यात् प्रत्यये न स्यात् । 'उदात्तवति' किम् । प्रपचति ॥

इति तिङन्तस्वराः ।

3978. A Gati becomes anudâtta, when followed by an accented finite verb.

The word गतिः is understood here. Thus यत् प्र॒प॑चति ॥

Why have we used the word तिङि in the sûtra? In order to restrict the scope of the word उदात्तवति; so that a Gati would not become accentless before udâtta root only, but before udâtta conjugated *verbs*. The employment of the

term तिङि is necessary, in order to indicate that the *verb* must be a *finite* verb and not a *verbal root*. So that though a verbal root be udâtta, yet if in its conjugated form (तिङन्त) it is not udâtta, the गति will not lose its accent. Thus in यत् प्र करोति, the root कृ is anudâtta, but the तिङन्त form करोति is udâtta, hence the rule will apply here: which would not have been the case had उदात्तवति not been qualified by तिङि । For the maxim is धातुक्रियायुक्ताः प्रादयः, तेषां तं प्रति गत्युपसर्गसंज्ञे भवतः । Therefore in a तिङन्त, the designation of गति is with regard to धातु or verbal root.

Why have we used the word उदात्तवति ? Observe प्र पचति । Here the verb loses its accent by VIII. 1. 28 hence the Gati retains its accent.

*Here end the Accents of Verbs.*

---

## A VAIDIC ILLUSTRATION ON ACCENTS.

अथ वैदिकवाक्येषु स्वरसंचारप्रकारः कथ्यते–'अग्निमीळे' इति प्रथमर्क् । तत्राग्निशब्दोऽव्युत्पत्तिपक्षे 'फिषः–' इत्यन्तोदात्त इति माधवः । वस्तुतस्तु घृतादित्वात् । व्युत्पत्तौ तु नित्प्रत्ययस्वरेण । अम्सुप्त्वादनुदात्तः । 'अमि पूर्वः' (१८४) इत्येकादेशस्तु 'एकादेश उदात्तेन–' (३६५८) इत्युदात्तः । ईळे । 'तिङ्ङतिङः' (३९३५) इति निघातः । संहितायां तु 'उदात्तादनुदात्तस्य–' (३६६०) इतीकारः स्वरितः । 'स्वरितात्संहितायाम्–' (३६६८) इति 'ळे' इत्यस्य प्रचयापरपर्याया एकश्रुतिः । पुरःशब्दोऽन्तोदात्तः 'पूर्वाधरावराणाम्–' इत्यसिप्रत्ययस्वरात् । हितशब्दोऽपि धाञो निष्ठायां 'दधातेर्हिः' (३०७६) इति ह्यादेशे प्रत्ययस्वरेणान्तोदात्तः । 'पुरोऽव्ययम्' (७६८) इति गतिसंज्ञायां 'कुगति–' (७६१) इति समासे समासान्तोदात्ते 'तत्पुरुषे तुल्यार्थ–' (३७३६) इत्यव्ययपूर्वपदप्रकृतिस्वरे 'गतिकारकोपपदात्कृत्' (३८७३) इति कृदुत्तरपदप्रकृतिस्वरे थाथादिस्वरे च पूर्वं पूर्वोपमर्देन प्राप्ते 'गतिरनन्तरः' (३७८२) इति पूर्वपदप्रकृतिस्वरः । पुरःशब्दोकारस्य संहितायां प्रचये प्राप्ते 'उदात्तस्वरितपरस्य सन्नतरः' इत्यनुदात्ततरः । यज्ञस्य । नङः प्रत्ययस्वरः । विभक्तेः सुप्त्वादनुदात्तत्वे स्वरितत्वम् । देवम् । ऋत्विजम् । फिट्स्वरेण प्रत्ययस्वरेण चित्स्वरेण वान्तोदात्तः । ऋत्विक्छब्दः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः । होतृशब्दस्तृन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः । रत्नशब्दो नप्रत्ययस्य नित्त्वादाद्युदात्तः । रत्नानि दधातीति रत्नधाः । समासस्वरेण कृदुत्तरपदप्रकृतिस्वरेण वान्तोदात्तः । तमपः पित्त्वादनुदात्तत्वे स्वरितप्रचया वित्यादि यथाशास्त्रमूह्यम् ॥

इति स्वरप्रकरणम् ।

इत्थं वैदिकशब्दानां दिङ्मात्रमिह दर्शितम् ।

तदस्तु प्रीतये श्रीमद्भवानीविश्वनाथयोः ॥

Now we shall give an illustration from the Vedas, to show the application of the rules of accent. Thus the first verse of the Rig Veda is the following:—

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं । होतारं रत्नधातमम् ॥

1. Agni :—Here if अग्नि be considered a word without any derivation then it is finally acute by Phit I. 1. This is the opinion of Mâdhava (Sâyanâchârya). But as a matter of fact, अग्नि is end-acute because it is enumerated in the Ghṛitâdi list of words (see Phiṭ I. 21.)

But if अग्नि be considered a derivative word, formed by the Uṇâdi affix नि then it is end-acute, (III. 1. 3. S. 3708), because of the affix.

The accusative affix अम् in अग्निम् is anudâtta because it is a case-affix (III. 1. 4. S. 3709). अग्नि + अम् = अग्निम् (इ + अ = इ S. 194) The ekâdeśa इ becomes udâtta by VIII. 2. 5. S. 3658. Thus अग्निम् is end-acute even in its declined form.

2. ईळे: is a verb. It loses its accent by S. 3935 (VIII. 1. 28) as it is preceded by a noun *agnim*. When अग्निम् + ईळे are combined in the Sanhita text into अग्निमीळे, then the anudâtta इ becomes svarita by S. 3660 (VIII. 4. 66) while the anudâtta of ळे becomes ekasruti by S. 3668 (1. 2. 39). Thus we have अग्निमीळे ॥

3. पुरोहितम् :—The word पुरः is end-acute because it is formed by the affix असि (V. 3. 39. S. 1975). The word हित also is end-acute, because it is the Nishṭhâ of धा, the हि is substituted for धा by S. 3076 (VII. 4. 42) the affix त makes it end-acute. Then पुरः + हितः । Here पुरः is a gati by S. 768 (I. 4. 67) and it is compounded with हित by S. 761 (II. 2. 18). Then the compound पुरोहित would be end-acute by S. 3734 ; but S. 3736 ( VI. 2. 2) requires the Indeclinable first member पुरः to retain its accent; but S. 3873 (VI. 2. 139) requires the second member हित which is a kṛit-formed word to retain its accent also VI. 2. 144 ; but this last accent is set aside by the final rule S. 3783 (VI. 2. 49) and thus the first member retains its recent, as पुरोहित ॥

It becomes anudâttatara by I. 2. 40 S. 3669.

4. यज्ञस्य:-The word यज्ञ is derived from यज् with नङ् affix. Therefore it is end-acute. The affix स्य being a case-affix (III. 1. 4. S. 3709) is anudâtta and it becomes svarita यज्ञस्य ॥

5. देवं:—It is formed from the root दिव् with the affix अच् । It is end acute, either by Phit I. 1 ; or by the affix-accent (III. 1. 3. S. 3708) or by the चित् accent (VI. 1. 163 S. 3710) of अच् । In any view, it is end-acute.

6. ऋत्विजं :—The word ऋत्विज् is end-acute, because of the kṛit-accent (VI. 2. 139, S. 3873).

7. होतारम् :—The word होतृ is formed by adding the affix तृन् to हु । It has accent on हो, because the affix has an indicatory न् (VI. 1. 197 S. 3686).

8. रत्नधातमम् । It means रत्नानि दधाति । It is finally acute, either by samâsa accent (VI. 1. 223. S. 3734) or kṛit-accent of the second member being retained by VI. 2. 139 S. 3873.

The affix तमप् being पित् is anudâtta, the म of त becomes svarita, and that of म becomes ekaśruti. रत्न is first acute being Neuter (Phiṭ II. 3.)

## *Here ends the Section on Accents.*

Thus here has been shown a brief outline only of Vaidic words and the rules applicable to them. Let it find favor with the Lord of the Universe and Bhavâni.

# अथ लिङ्गानुशासनम् ॥

—o—

# ON RULES OF GENDERS.

## CHAPTER I.

### FEMININE GENDER.

१ । 'लिङ्गम्' ॥

1. The Gender.

NOTE :—There are three Genders, *viz* :—Masculine, Feminine and Neuter.

२ । 'स्त्री' । अधिकारसूत्रे एते ॥

2. The Feminine (Gender).

These two are Adhikâra Sûtras. The jurisdiction of the word "gender' extends up to the end; but of "feminine" up to the end of this chapter only

३ । 'ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः' । ऋकारान्ता एते पञ्चैव स्त्रीलिङ्गाः । स्वस्रादिपञ्चकस्यैव ङीप्निषेधेन कर्त्री त्यादेर्ङीपाईकारान्तत्वात् । तिसृचतस्रोस्तु स्त्रियामादेशतया विधानेऽपि प्रकृत्योस्त्रिचतुरोर्ऋदन्तत्वाभावात् ॥

3. मातृ 'mother,' दुहितृ 'daughter,' स्वसृ 'sister,' यातृ 'a husband's brother's wife,' ननान्दृ 'a husband's sister,' these five nouns ending in ऋ are feminines.

These five words are the only examples of feminines that naturally end in ऋ। By IV. 1. 10, S. 308, the seven words belonging to the svasrâdi class do not form their feminine by ङीप् or टाप् like the nouns kartṛi &c. which end in long ई in the feminine. Hence they are feminine in their original form. A reference to the Svasrâdi list will show that it includes all these five words, in addition to तिसृ and चतसृ । As these two are secondary derivatives, from त्रि and चतुर् they are not originally feminine but have become so by derivation. The primitive words त्रि and चतुर् do not end in ऋ; and hence तिसृ and चतसृ are not shown in this sûtra.

४ । 'अन्यूप्रत्ययान्तो धातुः' । अनिप्रत्ययान्त ऊप्रत्ययान्तश्च धातुः स्त्रियां स्यात् । अवनिः, चमूः । 'प्रत्ययग्रहणम्' किम् । देवयतेः क्विप् । द्यूः । विशेष्यलिङ्गः ॥

4. Verbal nouns formed with the affixes अनि and ऊ are feminines.

Thus अवनिः 'the earth' (Uṇ. II. 102). चमूः 'an army.' (Uṇ. I. 80). Why do we say "formed with affixes"? Observe द्यूः which is formed by adding the affix क्विप् to the root दिव् (to shine). The word द्यूः is feminine and of special gender.

५ । 'अशनिभरण्यरणयः । पुंसि च' । इयमयं वाशनिः ॥

5. The nouns अशनि, 'Indra's thunderbolt,' भरणि 'Bharaṇi' अरणि 'a piece of wood used for kindling sacred fire,' are also masculines (in addition to being feminines).

Thus इयं or अयं अशनिः । This sûtra is an exception to the preceding. These three words though formed by the affix अनि (Uṇ. II. 102) are yet both masculine and feminine.

६ । 'मिन्यन्तः' । मिप्रत्ययान्तो निप्रत्ययान्तश्च धातुः स्त्रियां स्यात् । भूमिः । ग्लानिः ॥

6. Verbal nouns formed with the affixes मि and नि are feminines.

Thus भूमिः 'the earth' (Uṇ. IV. 45); ग्लानिः 'exhaustion'. (Uṇ. IV. 51).

७ । 'वह्निवृष्ण्यग्नयः पुंसि' । पूर्वस्यापवादः ॥

7. But the nouns वह्नि 'fire' (Uṇ. IV. 51), वृष्णि 'a cloud,' (Uṇ. IV. 49) and अग्नि 'fire' (Uṇ. IV. 50) are masculines. This is an exception to the last.

८ । 'श्रोणियोन्यूर्मयः पुंसि च' । इयमयं वा श्रोणिः ॥

8. The nouns श्रोणि 'the hip,' (Uṇ. IV. 5) योनि 'the source'. (Uṇ. IV. 51) and ऊर्मि 'the wave' (Uṇ. IV. 44) are also masculines (in addition to being feminines).

Thus इयं or अयं श्रोणिः ॥

९ । 'क्तिन्नन्तः' । स्पष्टम् । कृतिरित्यादि ॥

9. Nouns formed with the affix क्तिन् are feminines.

Thus कृतिः &c.

१० । 'ईकारान्तश्च' । ईप्रत्ययान्तः स्त्री स्यात् । लक्ष्मीः ॥

10. Nouns ending in long ई affix are feminines.

Thus लक्ष्मीः ॥

The ई here must be an affix: as in लक्ष्मी the affix ई is added by Uṇ. III. 160.

११ । 'ऊङाबन्तश्च' । कुरूः । विद्या ॥

11. Nouns formed with the affixes ऊङ्, (IV. 1. 66) and आप् are feminines.

Thus कुरूः (See IV. 1. 66. S. 521) and विद्या. The आप् includes all the three affixes टाप्, चाप् and डाप् ॥

१२ । 'य्वन्तमेकाक्षरम्' । धीः । भूः । 'एकाक्षरम्' किम् । पृथुश्रीः ॥

12. Monosyllabic nouns formed with the affixes ई and ऊ are feminines.

Thus धीः (Uṇ. II. 57) भूः ॥

Why do we say 'monosyllabic nouns'? Observe पृथुश्रीः "Prithu's luck" which is masculine.

१३ । 'विंशत्यादिरानवतेः' । इयं विंशतिः । त्रिंशत् । चत्वारिंशत् । पञ्चाशत् । षष्टीः । सप्ततिः । अशीतिः । नवति ॥

13. Numerals from "twenty" to "ninety" are feminines.

Thus इयं विंशतिः 'twenty'. So also त्रिंशत् 'thirty'. चत्वारिंशत् 'forty,' पञ्चाशत् 'fifty'; षष्टिः 'sixty', सप्ततिः 'seventy,' अशीतिः 'eighty', नवतिः 'ninety.'

The list of the words "विंशति and the rest" is given in Pâṇini's Sûtra V. I. 59. S. 1725.

१४ । 'दुन्दुभिरक्षेषु' । इयं दुन्दुभिः । 'अक्षेषु' किम् । अयं दुन्दुभिर्वाद्यविशेषोऽसुरो वेत्यर्थः ।

14. The word दुन्दुभि when used in the sense of an axle pole is feminine.

Thus इयं दुन्दुभिः ॥

Why do we say in the sense of अक्ष 'or axle'? Observe अयं दुन्दुभिः । It is masculine when it means a musical instrument or an Asura.

१५ । 'नाभिरक्षत्रिये' । इयं नाभिः ॥

15. The word नाभि 'navel' is feminine when it does not mean a Kshatriya.

Thus ह्रदं नाभिः 'navel'.

१६ । 'उभावप्यन्यत्र पुंसि' । दुन्दुभिर्नाभिश्चोक्तविषयादन्यत्र पुंसि स्तः। नाभिः क्षत्रियः। कथं तर्हि 'समुल्लसत्पङ्कजपत्रकोमलैरुपाहितश्रीण्युपनीविनाभिभिः' इति भारविः। उच्यते। दृढं भक्तिरित्यादाविव कोमलैरिति सामान्ये नपुंसकं बोध्यम्। अस्तु वा 'लिङ्गमशिष्यं लोकाश्रयत्वा- ल्लिङ्गस्य' इति भाष्यात्पुंस्त्वमपीह साधु । अत एव 'नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान्'। द्वयोः प्राणिप्रतीके स्यात्स्त्रियां कस्तूरिकामदे' इति मेदनी। रभसोऽप्याह- 'मुख्यराट्क्षत्रिय नाभिः पुंसि प्राण्यङ्गके द्वयोः। चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे' इति। एवमेवंविधेऽन्यत्रापि बोध्यम् ॥

16. Otherwise दुन्दुभि and नाभि are masculines.

Thus नाभिः क्षत्रियः 'Nâbhi—a Kshatriya.'

If the word नाभिः be feminine in all senses other than that of a Kshatriya, how do you justify its use as a masculine in the following lines of Bhâravi:—
"समुल्लसत् पङ्कजपत्रकोमलै रुपाहितश्रीण्युपनीवि नाभिभिः"? ॥

To this we say, "The words कोमलैः &c. here are really Neuter, denoting indiscrete gender, or having no reference to any gender, just like दृढभक्तिः" ॥ Or we may say, as a matter of fact the gender of words need not be taught, for it is a well-known maxim of grammar as enunciated by Patanjali that "the gender depends on the usage of the people : and so need not be taught:" and therefore the masculine use of the word is also correct. Thus we find in the Medini Kosha:—"Nâbhi is masculine when meaning a paramount sovereign, or the nave of a wheel, or a Kshatriya. But when meaning 'navel' of a living being, it is of both genders. And it is feminine only when meaning 'musk.'

Rasabha also says to the same effect :—

'The word nâbhi is masculine when it means a paramount lord, or a Kshatriya: it is both masculine and feminine when meaning the navel of a living being, the nave of a wheel, and a leader or chieftain. It is purely feminine when meaning "musk".

Thus it should be understood in other cases also.

१७। 'तलन्तः'। अयं स्त्रियां स्यात्। शुक्लस्य भावः। शुक्लता। ब्राह्मणस्य कर्म ब्राह्मणता ग्रामस्य समूहो ग्रामता। देव एव देवता ॥

17. Nouns formed with the affix तल् (V. 1. 119 S. 1781), are feminines.

Thus शुक्लता (whiteness), ब्राह्मणता (Brahmanical), ग्रामता (rural) देवता which has the same meaning as देव ॥

१८। 'भूमिविद्युत्सरिल्लतावनिताभिधानानि'। भूमिर्भूः। विद्युत्सौदामनी। सरिन्निम्नगा। लता वल्ली। वनिता योषित् ॥

18. Nouns synonymous of भूमि (the Earth), विद्युत् (lightening), सरित् (a stream or rivulet), लता (a creeper), वनिता (wife) also are feminines.

Thus भूमिर्भूः ; विद्युत् सौदामनी ; सरित् निम्नगा ; लतावल्ली ; वनिता योषित्.

१९। 'यादो नपुंसकम्'। यादःशब्दः सरिद्वाचकोऽपि क्लीबं स्यात् ॥

19. यादस्, although meaning 'a stream,' is Neuter and not feminine.

२० । 'भास्स्रग्दिगुष्णिगुपानहः' । एते स्त्रियां स्युः । इयं भाः इत्यादि ॥

20. The nouns भास्, स्रज्, दिश्, उष्णिह् and उपानह् are feminines.

Thus इयं भाः &c.

२१ । 'स्थूणोर्णे नपुंसके च' । एते स्त्रियां क्लीबे च स्तः । स्थूणा-स्थूणम् । ऊर्णा-ऊर्णम् । तत्र स्थूणा काष्ठमयी द्विकर्णिका । ऊर्णा तु मेषादिलोमम् ॥

21. The nouns स्थूणा (a post or pillar) and ऊर्णा (wool) are Neuter (in addition to being feminine).

Here sthûṇâ means a wooden forked stave or pillar and ûrṇâ means the wool of sheep &c.

२२ । 'गृहशशाभ्यां क्लीबे' । नियमार्थमिदम् । गृहशशाद्भ्यां स्थूणोर्णे यथासंख्यं नपुंसके स्तः । गृहस्थूणम् । 'शशोर्णं शशलोमनि' इत्यमरः ॥

22. The words स्थूणा and ऊर्णा after गृह and शश are Neuter.

Thus गृहस्थूणम् (a pillar of a house) and शशोर्णं (the hare's hair). This is a niyama or a restrictive rule. See Amarakosha II. 9. 107.

२३ । 'प्रावृड्विप्रुड्तृड्विट्त्विषः' । एते स्त्रियां स्युः ॥

23. The words प्रावृट्, 'the rainy season', विप्रुट् 'a drop of liquid,' तृट् 'thirst,' विट् 'fœces, excrement,' and त्विट् 'light' are feminine.

२४ । 'दर्विविदिवेदिखनिशान्यश्रिवेशिकृष्योषधिकट्यङ्गुलयः' । एते स्त्रियां स्युः । पक्षे ङीप् । दर्वी-दर्विरित्यादि ॥

24. The words दर्वि, 'a ladle,' विदि, 'knowledge' (?) वेदि, 'altar,' खनि 'a mine,' शानि 'colocynth'; अश्रि 'a corner,' वेशि 'an entrance' (?) कृषि 'agriculture,' ओषधि 'herb,' कटि 'loin' and अङ्गुलि 'finger' are feminine.

These words take optionally the affix ङीप्.

Thus दर्वी or दर्विः &c.

२५ । 'तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिच्छविरात्र्यादयः' । एते प्राग्वत् । इयं तिथिरित्यादि । अमरस्त्वाह-'तिथयो द्वयोः' इति । तथा च भारविः-'तस्य भुवि बहुतिथास्तिथयः' इति । स्त्रीत्वे हि बहुतिथ्य इति स्यात् । श्रीहर्षश्च-'निखिलां निशि पौर्णिमा तिथीन्' इति ॥

25. The words तिथि 'the day of the moon,' नाडि 'a vessel or pulse,' रुचि 'taste,' वीचि 'a wave,' नालि 'a drain,' धूलि 'dust,' किकि 'the cocoanut tree,' केलि 'play,' छवि 'hue, color,' रात्रि 'night' are feminines.

As इयं तिथिः &c.

But the author of Amarakosha says 'the word तिथि is both masculine and feminine.' (Amar. I. 4. 1).

So also Bhâravi in the following line: 'तस्य भुवि बहुतिथास्तिथयः । Had it been feminine the word would have been बहुतिथ्यः in the Plural and not बहुतिथाः ॥

So also Śrî Harsha in the following line: निखिलान् निशि पौर्णिमा तिथीन् uses the word tithi as a masculine.

२६। ' शष्कुलिराजिकुट्यशनिवर्तिभ्रुकुटित्रुटिवलिपङ्क्तयः' । एतेऽपि स्त्रियां स्युः। एवं शष्कुलिः ॥

26. The words शष्कुलि 'auditory passage,' राजि 'a streak,' कुटि 'a cottage,' अशनि 'lightening,' वर्ति 'a pad,' भ्रुकुटि 'frown,' त्रुटि 'cutting,' वलि 'sacrificial offering,' पङ्क्ति 'a line' are feminines.

Thus एवं शष्कुलिः ॥

२७। 'प्रतिपदापद्विपत्संपच्छरत्संसत्परिषदुषःसंवित्क्षुत्पुन्मुत्समिधः' । एवं प्रतिपदित्यादि । यथा उषःकान्ती। उषाः प्रातरधिष्ठात्री देवता ॥

27. The words प्रतिपद् 'entrance,' आपद् 'calamity' विपद् 'misfortune,' सम्पद् 'wealth,' शरद् 'the autumn' (Uṇ I. 129). संसद् 'an assembly,' परिषद् 'a meeting,' उषस् 'Dawn,' संविद् 'knowledge,' क्षुध् 'grinding; crushing,' पुत् 'a particular division of Hell,' मुद् 'joy; delight,' समिध् 'wood; fuel,' are feminines.

Thus एवं प्रतिपद् ॥

उषा उषःकान्ती । The Ushâ is the presiding deity of the dawn.

२८। 'आशीर्धूःपूर्गीर्द्वारः' । इयमाशीरित्यादि ॥

28. The words आशिस् 'blessing,' धुर् 'a yoke,' पुर् 'a city,' गिर् 'speech' and द्वार् 'door' are feminines.

As इयं आशीः ॥

२९। 'अप्सुमनस्समासिकतावर्षाणां बहुत्वं च' । अबादीनां पञ्चानां स्त्रीत्वं स्याद्बहुत्वं च। आपः इमाः। 'स्त्रियः सुमनसः पुष्पम्'। 'सुमना मालती जातिः'। देववाची तु पुंस्येव। 'सुपर्वाणः सुमनसः'। बहुत्वं प्रायिकम्। 'एका च सिकता तैलदानेऽसमर्था' इत्यर्थवत्सूत्रे भाष्यप्रयोगात्। 'समांसमां विजायते' (१८१३) इत्यत्र 'समायां समायाम्' इति भाष्यात्। 'विभाषा ग्राधेट्–(२३७४) इति सूत्रे 'अघ्रासातां सुमनसौ' इति वृत्त्याख्यायां हरदत्तोऽप्येवम् ॥

29. The words अप् 'water,' सुमनस् 'a flower' (jasmine), समा 'a year' सिकता 'sand, gravel,' and वर्षा 'rain,' are feminines and used in the plural number only.

Thus आपः इमाः । The word sumanas in the feminine means 'a kind of flower'—namely, the flower called mâlati or jâti—jasmine, as स्त्रियः सुमनस पुष्पं । Amarakosha II. 4. 17. When it means a Deva or a divine being, it is masculine only. As सुपर्वाणः सुमनसः । See Amarakosha I. 1. 7. Here the present sûtra is debarred by sûtra 9 of the next chapter, with regards to words denoting Devas.

These words are generally found, in usage, in the plural number: but sometimes they are used in the singular also; as एका च सिकता तैलदाने असमर्था 'one grain of sand is incapable of producing oil.' This example is given by Patanjali in his Mahâbhâshya under sûtra I. 2. 45.

Similarly समां समां विजायते (V. 2. 12. S. 1813) has been explained in the Bhâshya by समायां समायां in the singular number.

Kâśikâ uses the word सुमनस् in the dual also, under sûtra II. 4. 78. in the example अपाहाताम् सुमनसौ देवदत्तेन । Haradatta in his Padamanjarî, on commenting on this justifies the use of the dual, by saying "according to Amarasiṁha sumanasaḥ in the plural is feminine. According to Pâṇinîya sûtra apsumanasa, &c., this word requires to be always plural. That plurality is not, however, universal : as we find the Mahâbhâshya using the word *sikatâ* in the singular."

(स्त्रियः सुमनसः पुष्पमित्यमरसिंहः। अप्सुमनः समासिकता वर्षाणां बहुत्वं चेति पाणिनीयं सूत्रं, तद् बहुत्वं प्रायिकं मन्यते 'एका च सिकता तैलदानेऽसमर्था' इति भाष्ये प्रयोगात् ॥)

३० । 'स्रक्त्वक्ज्योग्वाग्यवागूनौस्फिचः' । इयं स्रक्त्वक्ज्योक्वाक्यवागूः नौः स्फिक् ॥

30. The words स्रज् 'garland,' त्वक् 'skin,' ज्योक् 'long' (an Indeclinable I. 1. 37), वाच् 'speech,' यवागू 'barley gruel,' नौ 'boat' and स्फिच् 'hips' are feminines.

Thus इयं स्रक्, त्वक्, ज्योक्, वाक्, यवागूः, नौ and स्फिक् ॥

३१ । 'त्रुटिसीमासंबध्याः' । इयं त्रुटिः सीमा संबध्या ॥

31. The words त्रुटि, ? सीमा 'boundary' and संबध्या ? are feminines

Thus इयं त्रुटि, सीमा or संबध्या ॥

३२ । 'चुल्लिवेणिखार्यश्च' । स्पष्टम् ॥

32. The words चुल्लि 'a fire-place,' वेणि 'a braid of hair' (Un. IV. 48) खारि 'a measure of grain,' are feminines.

३३ । 'ताराधाराज्योत्स्नादयश्च' । शलाका स्त्रियां नित्यम् । नित्यग्रहणमन्येषां क्वचिद्व्यभिचारं ज्ञापयति । इति स्त्र्यधिकारः ॥

33. The words तारा 'a star,' धारा 'a current,' ज्योत्स्ना 'light' &c. are feminines.

The word शलाका 'a small stick,' is ALWAYS feminine.

NOTE :—The force of the word 'always' is that the other words given above, may be of masculine or neuter gender also. In fact, the gender depends upon usage.

## CHAPTER II.

## THE MASCULINE GENDER.

१ 'पुमान्' । अधिकारोऽयम् ॥

1. The Masculine Gender.

This is an *adhikára* Sûtra.

२ । 'घञबन्तः' । पाकः । त्यागः । करः । गरः । भावार्थ एवेदम् । नपुंसकत्वविशिष्टे भावे क्तल्युड्भ्यां स्त्रीत्वविशिष्टे तु क्तिन्नादिभिर्बाधेनपरिशेषात् । कर्तरि तु घञाद्यन्तमपि विशेष्यलिङ्गम् । तथा च भाष्यम्- 'संबन्धमनुवर्तिष्यते' इति ॥

2. Nouns formed with the affixes घञ् and अप् are masculine.

Thus with घञ्;—पाकः 'cooking', त्यागः 'renunciation,' with अप्, we have करः 'hand,' गरः 'poison'.

The affix घञ् must have the force of भाव or condition for the purposes of this rule. In other words, the nouns so formed should be abstract nouns or nouns of action. This meaning of घञ् we infer from the analogy of the two rules, one relating to the Feminines and the other to the Neuters. Thus with regards to Neuters we have the rules भावे ल्युडन्तः । निष्ठा च ॥ "Nouns formed by the affix lyuṭ with the force of *bháva*; and the Nisṭhâ affixes with the same force are Neuters." (Chap. III. 2 and 3). Similarly in the case of the feminines, we have the rules क्तिन्नन्तः &c. (Chapter I. 9) &c. where क्तिन् &c. are *bháva* affixes. Analogically the घञ् here must also be a bhâva denoting affix. For the force of घञ् is generally that of भाव or Noun of action. See III. 3. 16—18. To form Neuter nouns of action we have *kta* and *lyuṭ* by III. 3. 114 and 115. To form feminine nouns of action we have *ktin*, *kyap*, &c. by III. 3. 95, 98. Therefore by elimination, to form the masculine nouns of action, to us is left the affix घञ् only. Hence we say 'the ghañ here has the force of bhâva.'

But when ghañ has the force of karma or of karaṇa &c., as it has by III 3. 116 and 117 &c., then the words so formed need not be masculine. They will have the gender of the word with which they are in construction. They will have their own specific gender. As we have in the Bhâshya, सम्बन्धमनुवर्तिष्यते । Here the word 'sambandha' though formed by ghañ is used in the Neuter gender: because the force of ghañ is here that of karma.

३ । 'घाजन्तश्च' । विस्तरः । गोचरः । चयः । जयः इत्यादि ॥

3. The nouns formed with the affixes घ and अच् are masculines.

Thus विस्तरः 'extension,' गोचरः 'pasturage,' चयः 'rampart; collection'. जय 'victory' &c.

४ । 'भयलिङ्गभगपदानि नपुंसके' । एतानि नपुंसके स्युः । भयम् । लिङ्गम् । भगम् । पदम् ॥

4. The nouns भय 'fear', लिङ्ग 'gender', भग 'the perinaeum of females', पद 'foot' are neuters.

Thus भयम्, लिङ्गम्, भगम्, पदम्.

५ । 'नङन्तः' । नङ्प्रत्ययान्तः पुंसि स्यात् । यज्ञः । यत्नः ॥

5. The nouns formed with the affix नङ् are masculines.

Thus यज्ञः 'sacrifice,' यत्नः 'effort'.

६ । 'याच्ञा स्त्रियाम्' । पूर्वस्यापवादः ॥

6. The noun याच्ञा 'begging' is feminine.

This is an exception to the last aphorism.

७ । 'क्यन्तो घुः' । किप्रत्ययान्तो घुः पुंसि स्यात् । आधिः । निधिः । उदधिः । 'क्यन्तः' किम् । दानम् । 'घुः' किम् । अग्निर्बीजम् ॥

7. The nouns formed with the affix कि from roots belonging to the घु class are masculines.

The roots belonging to घु class are दा and धा. Thus आधिः 'agony', निधिः 'abode,' उदधिः 'water.' Why do we say "formed with the affix कि"? Observe दानम् (which is Neuter),

Why do we say "roots belonging to the षु class" ? Observe पक्षिवीजम्.

८ । 'इषुधिः स्त्री च' । इषुधिशब्दः स्त्रियां पुंसि च । पूर्वस्यापवादः ।

8. The noun इषुधिः 'a quiver' is both masculine and feminine.

Thus अयं or इयं इषुधिः ।

९ । 'देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि' । एतानि पुंसि स्युः । देवाः सुराः । असुरा दैत्याः । आत्मा क्षेत्रज्ञः । स्वर्गो नाकः । गिरिः पर्वतः । समुद्रोऽब्धिः । नखः कररुहः । केशः शिरोरुहः । दन्तो दशनः । स्तनः कुचः । भुजो दोः । कण्ठो गलः । खड्गः करवालः । शरो मार्गणः । पङ्कः कर्दम इत्यादि ॥

9. The words which are synonyms of देव 'god,' असुर 'demon,' आत्म 'self,' स्वर्ग 'the heaven,' गिरि 'the mountain,' समुद्र 'the sea,' नख 'the nail', केश the hair,' दन्त 'the tooth,' स्तन 'the breast,' भुज 'the arm,' कण्ठ 'the throat,' खड्ग 'the dagger,' शर 'the lake,' पङ्क 'the mud' &c. are masculines.

Thus देवाः सुराः ; असुराः दैत्याः ; आत्मा क्षेत्रज्ञः ; स्वर्गो नाकः ; गिरिः पर्वतः ; समुद्रोऽब्धि ; नखाः कररुहाः ; केशाः शिरोरुहाः ; दन्तो दशनः ; स्तनः कुचः ; भुजो दोः ; कण्ठो गलः- खड्गः करवालः ; शरोमार्गणः ; पङ्कः कर्दमः &c.

१० । 'त्रिविष्टपत्रिभुवने नपुंसके' । स्पष्टम् । तृतीयं विष्टपं त्रिविष्टपम् । स्वर्गाभिधानतया पुंस्त्वे प्राप्तेऽयमारम्भः ॥

10. The noun त्रिविष्टप meaning 'the heaven' is neuter. This word being synonymous with स्वर्ग would have been considered masculine by the last aphorism, but this aphorism prevents that.

११ । 'द्यौः स्त्रियाम्' । द्योदिवोस्तन्त्रेणोपादानमिदम् ॥

11. The nouns द्यो and दिव् 'the heaven' are feminines.

By sûtra 9, these two words being synonyms of स्वर्ग would have been considered masculines, but this aphori sm prevents that.

१२ । 'इषुबाहू स्त्रियां च' । चात्पुंसि ॥

12. The nouns इषु 'the arrow' and बाहु 'the arm' are also feminines.

By the force of the letter च in the sûtra, these words are to be considered masculines also.

१३ । 'बाणकाण्डौ नपुंसके च' । चात्पुंसि । त्रिविष्टपेत्यादिचतुःसूत्री देवासुरेत्यस्यापवादः ॥

13. The nouns बाण 'an arrow' and काण्ड 'a section' are also neuters.

By the force of the letter च in the sûtra, these words are to be considered masculine also.

The last four sûtras are exceptions to the sûtra 9.

१४ । 'नान्तः' । अयं पुंसि । राजा । तक्षा । न च चर्म वर्मादिष्वतिव्याप्तिः । 'मन्व्यच्कोऽकर्तरि' इति नपुंसकप्रकरणे वक्ष्यमाणत्वात् ॥

14. The nouns ending in न् are masculines.

Thus राजन्, तक्षन् । But not चर्मन् 'skin,' वर्मन् 'armour' which are neuters. The rule however should not be extended to चर्मन्, वर्मन् &c. These are Neuters because of the subsequent rule III. 33.

१५ । 'क्रतुपुरुषकपोलगुल्फमेघाभिधानानि' । क्रतुरध्वरः । पुरुषो नरः । कपोलो गण्डः । गुल्फः प्रपदः । मेघो नीरदः ॥

15. The nouns which are synonyms of क्रतु 'the sacrifice,' पुरुषः 'the man, कपोल 'the cheek' गुल्फ 'the ankle,' मेघ 'cloud' are masculines

Thus क्रतुरध्वरः ; पुरुषोनरः ; कपोलो गण्डः ; गुल्फः प्रपदः ; मेघो नीरदः ॥

१६ । 'अभ्रं नपुंसकम्' । पूर्वस्यापवादः ॥

16. The nouns अभ्र 'cloud' is neuter.

This is an exception to the last.

१७ । 'उकारान्तः' । अयं पुंसि स्यात् । प्रभुः । इक्षुः । 'हनुर्हट्टविलासिन्यां नृत्यारम्भे गदे स्त्रियाम् । द्वयोः कपोलावयवे' इति मेदिनिः । 'करेणुरिभ्यां स्त्री नेभे' इत्यमरः । एवंजातीयक-विशेषवचनानाक्रान्तस्तु प्रकृतसूत्रस्य विषयः । उक्तं च–'लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः' इति । एवमन्यत्रापि ॥

17. The nouns ending in उ are masculine.

Thus प्रभुः ; इक्षुः ॥

According to Medini, the noun हनु when meaning 'a wanton woman,' 'the commencement of a dance,' or 'disease' is feminine. But it is both masculine and feminine when it means 'the chin.'

According to Amara, the noun करेणु when meaning 'a she-elephant' is feminine ; otherwise masculine when it means an elephant. The words which are subject to this rule are like these which are not governed by any other specific text to the contrary. As it has been said : "A rule of gender is of universal application if it is a śesha rule *i. e.*, a rule that *remains* after the application of all other rules. Provided that it is not debarred by any specific rule."

१८ । 'धेनुरज्जुकुहुसरयुतनुरेणुप्रियङ्गवः स्त्रियाम्' ॥

18. The nouns धेनु 'a cow,' रज्जु 'rope,' कुहु 'new moon-day,' सरयु 'the river Sarayu,' तनु 'body,' रेणु 'atom,' प्रियङ्गु 'name of a creeper' are feminine.

१९ । 'समासे रज्जुः पुंसि च' । कर्कटरज्ज्वा=कर्कटरज्जुना ॥

19. The noun रज्जु 'rope' in a compound is also used in the masculine. Thus कर्कटरज्ज्वा or कर्कटरज्जुना.

२० । 'श्मश्रुजानुवसुस्वादुअश्रुजतुत्रपुतालूनि नपुंसके' ॥

20. The nouns श्मश्रु 'bared,' जानु 'the knee,' स्वादु 'sweetness ; relish; taste,' अश्रु 'tear,' जतु 'wax,' त्रपु 'lead' and तालु 'the palate' are neuters.

२१ । 'वसु चार्थवाचि' । 'अर्थवाचि' इति किम् । 'वसुर्मयूखाग्निधनाधिपेषु' ॥

21. The noun वसु when meaning 'wealth' is neuter. Why do we say 'when meaning wealth'? For otherwise it is masculine when meaning मयूख 'a ray of light' अग्नि 'fire' and धनाधिप 'lord of wealth'.

२२ । 'मद्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च' । चात्पुंसि । अयं मद्गुः । इदं मद्गु ।

22. The nouns मद्गु 'a kind of pulse' ; मधु 'honey,' शीधु 'a kind of wine,' सानु 'summit,' कमण्डलु 'water-pot' are also neuters.

By the force of the letter च in the sûtra, these words are also masculines.

Thus अयं मद्गुः or इदं मद्गु.

२३ । 'रुत्वन्तः' । मेरुः । सेतुः ॥

23. The nouns formed with the affixes रु (Uṇ. IV. 101) and तु (Uṇ I. 69) are masculines.

Thus मेरुः 'Meru,' सेतुः 'a bridge.'

२४ । 'दारुकसेरुजत्रुवस्तुमस्तूनि नपुंसके' । कस्वन्त इति पुंस्त्वस्यापवादः । इदं दारु ॥

24. The nouns दारु 'tree,' कसेरु 'a kind of fruit,' जत्रु 'collar bone,' वस्तु 'object,' मस्तु 'sour cream, whey,' are Neuters.

This is an exception to the last sûtra. Thus इदं दारु । These words are all formed by रु and तु affixes and therefore ought to have been masculines.

२५ । 'सक्तुर्नपुंसके च' । चात्पुंसि सक्तुः–सक्तु ॥

25. The noun सक्तु 'porridge' is also neuter.

By the force of the letter च in the sûtra, it is also masculine. Thus सक्तुः or सक्तु.

२६ । 'प्राग्रश्मेरकारान्तः' । 'रश्मिदिवसाभिधानानि' इति वक्ष्यति प्राक् एतस्मादकारान्त इत्यधिक्रियते ॥

26. From this up to sûtra 66, the gender of nouns ending in अ will be mentioned.

This is an adhikâra-sûtra. It extends up to raśmi-divasâ (II. 66) and applies to nouns ending in अ ॥

२७ । 'कोपधः' । कोपधोऽकारान्तः पुंसि स्यात् । स्तबकः । कल्कः ॥

27. The nouns ending in अ with the penultimate क are masculines.

Thus स्तबकः 'a cluster'; कल्कः 'filth.' (Uṇ. III. 40).

२८ । 'चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके' । पूर्वसूत्रापवादः ॥

28. The nouns चिबुक 'the chin'; शालूक 'the root of the water-lily,' प्रातिपदिक, 'the crude-noun' अंशुक 'a garment,' उल्मुकं 'torch'; are neuters.

This is an exception to the last sûtra.

२९ । कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुष्कवर्चस्कपिनाकभाण्डकपिण्डककटकशण्डकपिटकतालकफलकपुलकानि नपुंसके च । चात्पुंसि । अयं कण्टकः । इदं कण्टकमित्यादि ।

29. The nouns कण्टक 'a thorn,' अनीक 'army' (Uṇ. IV. 16. 17) सरक 'a road;' 'liquor'; मोदक 'a sweetmeat,' चषक 'a goblet'; मस्तक 'the head,' पुस्तक 'book,' तडाक 'tank,' निष्क 'a kind of coin,' शुष्क 'dryness,' वर्चस्क 'lustre'; पिनाक 'the bow of Shiva;' भाण्डक 'a vessel,' पिण्डक 'a ball' कटक 'an army, belt', शण्डक staff,' पिटक 'basket' तालक 'yellow orpiment,' 'an ear ornament'; फलक 'blade,' पुलक a thrill of joy', are also neuters.

By the force of the letter च in the sûtra these words are also masculine. Thus अयं कण्टकः or इदं कण्टकम् &c.

३० । टोपधः । टोपधोऽकारान्तः पुंसि स्यात् । घटः पटः ॥

30. Nouns ending in अ with the penultimate ट are masculines.

Thus घटः 'a jar,' पटः 'a piece of cloth.'

३१ । किरीटमुकुटललाटवटवीटशृङ्गाटकराटलोष्टानि नपुंसके । किरीटमित्यादि ॥

31. The nouns किरीट 'a crown,' मुकुट 'a crown,' ललाट 'forehead,' वट 'kind of tree,' वीट (?) शृङ्गाट 'a mountain with three peaks,' 'a place where

four roads meet.' करट 'an elephant's cheek,' (Un. IV. 81) and लोष्ट 'a clod of earth' are also neuter.

By the force of the letter च in the sûtra, these words are also masculines.

Thus किरीटः or किरीटम् &c.

३२ । कुटकूटकपटकपाटकर्पटनटनिकटकीटकटानि नपुंसके च । चात्पुंसि । कुटः । कुटमित्यादि ॥

32. The nouns कुट 'a water pot ; a fort,' कूट 'fraud ; illusion ; a house' कपट 'hypocrite ; 'cheating,' कपाट 'door,' कर्पट 'patched garment,' नट 'a dancer', निकट 'near ; vicinity,' कीट 'a worm,' कट 'a mat' ; are also neuters.

By the force of the letter च they are also masculine. Thus कुटः or कुटम् &c.

३३ । णोपधः । णोपधोऽकारान्तः पुंसि स्यात् । गुणः । गणः । पाषाणः ॥

33. Nouns ending in अ with the penultimate ण् are masculines.

Thus गुणः 'quality,' गणः 'a host,' पाषाणः 'a stone.'

३४ । ऋणलवणपर्णतोरणरणोष्णानि नपुंसके । पूर्वस्यापवादः ॥

34. The nouns ऋण 'debt,' लवण 'salt,' पर्ण 'leaf,' तोरण 'a portal,' रण battle' उष्ण 'heat' are neuters.

This is an exception to the last sûtra.

३५ । कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च । चात्पुंसि ॥

35. The nouns कार्षापण 'a kind of coin,' स्वर्ण 'gold,' सुवर्ण 'gold,' व्रण 'boil,' चरण 'foot,' वृषण 'the scrotum ; विषाण 'a horn,' चूर्ण 'powder,' तृण 'grass,' are also neuters.

By the force of the letter च in the s tra, these words are also masculine.

३६ । थोपधः । रथः ॥

36. Nouns ending in थ with the penultimate थ् are masculines.

Thus रथः 'chariot'.

३७ । काष्ठपृष्ठरिक्थसिक्थोक्थानि नपुंसके । इदं काष्ठमित्यादि ॥

37. The nouns काष्ठ 'wood,' पृष्ठ 'back,' रिक्थ 'inheritance,' सिक्थ 'a bee's wax,' उक्थ 'a sentence' are neuters.

Thus इदं काष्ठम् &c.

३८ । काष्ठा दिगर्था स्त्रियाम् । इमाः काष्ठाः ॥

38. The noun काष्ठा when denoting 'a quarter or region of the world' is feminine.

Thus इमाः काष्ठाः ।

३९ । तीर्थप्रोथयूथगाथानि नपुंसके च । चात्पुंसि । अयं तीर्थः । इदं तीर्थम् ॥

39. The nouns तीर्थ 'pilgrimage,' प्रोथ 'the nose of a horse ; the hip,' यूथ 'a herd,' and गाथ 'a singer ; a song' are also neuters.

By the force of the letter च in the sûtra, these words are masculines also. Thus अयं तीर्थः or इदम् तीर्थम्.

४० । नोपधः । अदन्तः पुंसि । इनः । फेनः ॥

40. Nouns ending in अ with the penultimate न् are masculines.

Thus इनः 'a lord,' फेनः 'foam'.

४१ । जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके । पूर्वस्यापवादः ॥

41. The nouns जघन 'the hip,' (Uṇ. V. 32) अजिन 'the skin of a black antelope' (Uṇ. II. 48) तुहिन 'ice,' कानन 'forest,' वन 'forest,' वृजिन 'hair' 'sin,' विपिन 'a wood; a thicket,' (Uṇ. II. 52) वेतन 'pay,' शासन 'rule,' सोपान 'ladder,' मिथुन 'copulation,' श्मशान 'cemetry,' रत्न 'gem,' निम्न 'a low place, चिह्न 'sign' are neuters.

This is an exception to the last aphorism.

४२। मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दनालानसंमानभवनवसनसंभावनविभावनविमानानि नपुंसके च । चात्पुंसि । अयं मानः । इदं मानम् ॥

42. The nouns मान 'pride,' यान 'carriage,' अभिधान 'vocabulary, नलिन 'a lotus; a crane,' पुलिन 'a sandbank' (Uṇ. II. 53) उद्यान 'garden,' शयन 'sleeping,' आसन 'a seat,' स्थान 'a place,' चन्दन 'sandalwood,' आलान 'the tying-post,' संमान 'honor.' भवन 'house,' वसन 'dress,' संभावन 'possibility, विभावन (?) विमान 'a baloon' are also neuters.

By the force of the letter च in the sûtra, these words are also masculines.

Thus अयं मानः or इदं मानम् &c.

४३ । पोपधः । अदन्तः पुंसि । यूपः । दीपः । सर्पः ॥

43. Nouns ending in अ with the penultimate प् are masculine.

Thus यूपः 'a sacrificial' 'post' (Un. III· 27). दीपः 'a lamp' सर्पः 'a snake.'

४४ । पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणि नपुंसके । इदं पापमित्यादि ॥

44. The nouns पाप 'sin,' रूप 'form,' उडुप 'a raft,' तल्प 'bed,' शिल्प 'art,' पुष्प 'flower,' शष्प 'young grass,' समीप 'vicinity,' अन्तरीप 'an island; a promontary (VI. 3. 93) are neuters.

Thus इदं पापम् &c.

४५ । शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च । इदं शूर्पमित्यादि ॥

45. The nouns शूर्प 'a winnowing basket,' कुतप 'a Brâhmaṇa; a kind of grass,' कुणप 'a corpse, 'a spear,' द्वीप 'an island,' विटप 'a branch,' are also neuters (as well as masculines).

Thus अयं शूर्पः or इदं शूर्पम् &c.

४६ । भोपधः । स्तम्भः । कुम्भः ॥

46. Nouns ending in अ with the penultimate भ् are masculines.
Thus स्तम्भः 'a pillar,' कुम्भः 'a water jar.'

४७ । तलभं नपुंसकम् । पूर्वस्यापवादः ॥

47. The noun तलभ is neuter.

This is an exception to the last.

४८ । जृम्भं नपुंसके च । जृम्भम्-जृम्भः ॥

48. The noun जृम्भ 'yawning' is also neuter.

Thus जृम्भम् or जृम्भः

४९ । मोपधः । सोमः । भीमः ॥

49. Nouns ending in अ with the penultimate म् are masculine.

Thus सोमः 'the Soma,' भीमः 'Bhîma.'

५० । रुक्मसिध्मयुग्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके । इदं रुक्ममित्यादि ॥

50. The nouns रुक्म, 'gold,' सिध्म 'scab,' युग्म 'couple,' इध्म 'fuel,' गुल्म 'blossom,' अध्यात्म 'spiritual,' कुंकुम 'saffron' are Neuter.

